स्पवास्तन्समस्तप्रथे...

स्वरहितंवाक्यमुच्चार्यलेखनीयमेव

कम्मार्कण्डेयपुराणे एतद्दोषवदस्ति

प्रमत्तमीतिभागवतमतोकथनीयमश्रव

णीयञ्च 005539

मार्कण्डेयपुराणस्थननानार्षमित्याद्युक्त दृशादो

षवत्वंप्रज्ञानमानंदंब्रह्म अहंब्रह्मास्मितत्व

मसि अयमात्माब्रह्मयजमानःप्रस्तरइत्यादौ

वेदेमानिषादप्रतिष्ठांत्वमगमः शाश्वतीःसमाः

यत्क्रौंचमिथुनादेकमवधीःकाममोहितमि

...कीकिविरचितरामायणेनदीजलं

केशवनारिकेनुरित्यादौमहाभारतेहरिवंशपु

राणस्यपुष्करप्रादुर्भावादौचास्ति तत्रापित

वाभतस्यमते अशुद्धत्वादप्रामाण्यंस्यात् व

स्तुत एतद्दृशादोषवत्वंकाव्यप्रकाशादिग्र

न्थोक्तश्रुतकद्वादिदोषवत्वंचानार्षकाव्य

नाटकादिग्रन्थेष्वेवज्ञेयम् नत्वार्षग्रन्थेषु

त्यगिन पुराणादिग्रन्थेभ्यो निश्चीयत इति।

किंबहुना

कथंतर्हि शुकउक्तवानिदंभागवतंपरि

यो। क्षितमश्रीति नोक्तवान् कुतोनोक्तवा

नशुकस्तुयुद्धात्सुरामोक्षं प्राप्तवानिति
महाभारते शान्तिपर्वणि लिखितम् ।
अतोशुद्धमेवशुकः परीक्षितमुत्पु
क्तवानिति तर्हि छायाशुकेन प्रोक्त
मिति सतुगृहस्थोननग्नः व्यासप्रोक्त
मस्तिनवा नैव अम्बरीषशुकप्रोक्तं ।
नित्यंभागवतंश्रृणु हयग्रीवशुक
प्रोक्तं नित्यंभागवतंश्रृणिवति सर्वमि
दंकथनमशुद्धमेव

छायाशुकः पूर्वंगृहस्थोपिपश्चाद्वि बभूव परीक्षितप्रायोपवेशनात्पूर्वमेवपरमहंसाव स्थामुपगतस्तदाराजानंप्रति श्रीमद्भागवतमु क्तवानिति किंच महाभारत आदिपर्वणीइदं द्वैपायनः पूर्वंपुत्रमध्यापयच्छुकं ततोन्येभ्यो नुरूपेभ्यः शिष्येभ्यः प्रददौ विभुः षष्टिंशतस हस्राणिचकारान्यांससंहिताम् त्रिंशच्छतसह स्रंचदेवलोकेप्रतिष्ठितम् पित्र्येपंचदशप्रोक्तं गंधर्वेषुचतुर्दश एकंशतसहस्रंतुमानुषेषु प्रतिष्ठितम् नारदोऽश्रावयद्देवानसितोदेवलः पितॄन्गंधर्वयक्षरक्षांसिश्रावयामासवैशुकः

अस्मिंस्तु मानुषे लोके वैशंपायनऽ कवान् शि
ष्योव्यासस्यधर्मात्मासर्ववेदविदांवर इतिश्रीवेद
व्यासःपुत्रंशुकंमहाभारतमध्यापयदित्युक्तम्
तत्रापित्वयाशंकनीयम् शुकस्तुशास्त्रामो
क्षंप्राप्तवानितिमहाभारतेशान्तिपर्वणिलि
खितम् तर्हिकथंव्यासः शुकंमहाभारतम
ध्यापयदिति ननुछायाशुकमेवव्यासोमहा
भारतमध्यापयदिति नात्रशंकावसरइतिचेत्
शुकपदस्यछायाशुकरूपार्थेशक्तिकल्पनायामा
नाभावः ननुशांतिपर्वणोऽनुरोधाच्छुकपद
स्यताहशोर्थःकल्प्यतेइतिचेत् विनिगमनाविरहा
त् एतदनुसारेणशांतिपर्वणिप्रतिपादितस्यार
णिसंभस्यशुकस्यकल्पान्तरविषयत्वमेवकुतोन
कल्पते किंचशुकपदस्यछायाशुकइत्यर्थकरणेइदं
द्वैपायनःपूर्वपुत्रमध्यापयच्छुकमिति महाभार
तमहिमातिशयवर्णनस्यविच्छेदःस्यात् तस्मा
त्तत्रशुकपदंनछायाशुकपरं शान्तिपर्वणितुया
शुककथासाकल्पान्तरीयैवेतिवस्तुतस्तुमहा
भारतादिवर्णितादरणिसंभवाच्छुकाच्छाया
शुकाश्चान्योयंशुकः प्राप्तेकलियुगेव्यासश्च
क्रेयोजगतःकृते महाभारतमाख्यानंसर्ववेदार्थ

संग्रहमिस। इतथाब्रह्मचर्य्यपरिभ्रंशेमानुवाक्या
दुपस्थिते स्वयंपितरश्चरणान्मानेह्रिपवत्सोरु
मस्तपः विचिंत्यमनसाचक्रेभार्य्याजावालि
कन्यकाम् विटिकाख्यांददौतस्मैसोपिवैखानसा
श्रमी चक्रेतयासहतपः अनुगामीतदिच्छया।
अथगर्भोऽभवत्तस्मात्तस्यांसववृधेशनैः कलाभिः
शुक्लपक्षेवैहिमद्युतिरिवद्विज द्वादशाब्दान्जाता
निनप्रसूतेस्मसातदा कृष्णद्वैपायनप्रोक्तंवेदवेद
र्थसंग्रहं पुराणंभारतंधर्मशास्त्रंयदष्टणोद्विज
तत्सर्वंप्रज्ञयागर्भश्चक्रेहृदिपपाठच गर्भसंस्था
पिकुरुतेनतुनिष्क्रमणेमतिम् साचगर्भभरा
क्रांताऽऽत्यादि अथद्वादशमेवर्षेकृष्णद्वैपायनो
मुनिः उपविश्यकृतस्नानोगर्भमामंत्र्यसामभि
संबोधयामासतदावचोभिर्भक्तिभावितैः व्या
सउवाच यत्त्वंमदीयगृहिणीमधुनातिकाल
माविश्यपीडयसिगर्भतथाययार्थम् तद्बूहिनि
ष्क्रमसिनामकथंनमूढ किंमारयिष्यसिविरु
द्धकरस्त्वमेताम् गर्भउवाच इत्थोहमस्मिसुरय
स्तेत्यादिभ्रांतोहंतेषुसर्वेषुकोहंत्वांचब्रवीमिवि
म सांप्रतंमानुषोभूत्वाजठरेस्यात्त्ववस्थितः
नह्यासनेकरिष्यामिगर्भान्निष्क्रमणंवहिः ना

त्मानं वेष्टयिष्यामि दीनचित्तोऽजमाप्ययेत्यादि
व्यास उवाच यद्येवमस्त्यभिमतं भवतस्तर्हि नि
द्या निष्क्रम्य तुल्य नरकादिह गर्भवासात् सम्यक्
समाश्रय महोदयहेतुमेकं श्रीप्राणनाथमुभयोः
कुरु वा विवेकम् गर्भ उवाच ज्ञानं वि[illegible]भवमस्ति
च तावदेव वैराग्यमन्यभवसंस्मरणं च तावत् याव
न्न निष्क्रमति जंतुरितो निबद्धो देवस्य चित्तनिलय
स्य न मायया स्यात् इत्यादि व्यास उवाच माया भ
विष्यति न ते पुरुषोत्तमस्य वक्त्रं प्रदर्शय निजं मम
वत्स शीघ्रमित्यादि गर्भ उवाच यद्यत्र मे स भवि
ता प्रतिभूर्मुरारिर्माया प्रहानविषये यदुवंशनाथः
गर्भं विहाय न तदह्न बहिरद्य भावी नैवान्यथा कथम
पीति विनिश्चयो मे इत्यादि सूत उवाच इत्थं तदीय
वचनं द्विजसुश्रुवान्सः व्यासोऽतिदुःखितमनाः प्रय
यो तदानीं नारायणं व्यवसितो हृदि तस्य देहेनो राने
तु मीषद् निवृत्तमतिर्भवाब्धेः तत्र त्रिलोकमहिते
न कृतप्रणामः कृष्णेन विश्वसुहृदा द्विजदैवतेन
प्राप्ताहरणो निखिलमात्म हृदिस्थमस्मै व्यासो
न्यवेदयदसाव पितत्र पदे कर्तव्यमेन दिह नाम कि
यन्मदीयं गेहं पवित्रयितुमद्यतनागतस्य नीर्थस्य
जंगमगतिं दधनोंतरगं जबालशोधनपयेरितिचा

ह्वाचम् नारायणायचितिभाजनमेवमेवभूत्वाय
यौद्विजवरः सहक्रम्यमयुक्तः प्राहप्रविश्यपुनरेवस
कांदिशीकः किंचित्स्मरानुभवधिष्ठितगर्भशंकी
व्यासउवाच अयमस्याविर्भावोवैशारावस्यांग
दाधरः गृहीत्वैनंप्रतिभुवंनिष्क्रमंकुरुपुत्रक
गर्भउवाच त्वंब्रूहिमाधजगन्निगडोपमेयंमा
याखिलस्यनविलंघ्यतमात्वदीयावध्रातिनान
यदिगर्भमिमंविहाययास्यामिसंप्रतिवहिः प्र
तिभूस्त्वमत्रअब्रह्मविश्वमखिलंनवमाययैव
वध्नंत्वयैवभवदुःखहरस्त्वमेवेत्यादि सूतउवा
च इत्थंतदीयवचसाभगवान्प्रतीतः प्राहश्रह
स्यज्ञानकेरितिवाचमीशः मन्माययानभविता
तवसंप्रयोगोयोगारूढांगकुरुनिष्क्रमणांविशं
कंगंतासिमोक्षमधुनैवममप्रसादाज्जीवन्न
वाप्स्यसिमहोदयसौख्यमंगयंतंवदंतिमुनयोव
हुदुःखयोगबुद्धेर्वियोगमवियोगकरंमयातत्
वाक्यावसानमनुविश्यततस्तुगर्भात्तस्मात्कृटि
त्सएवविनिर्गतएवयोगीसद्यादशाब्दमतिवेषव
याः प्रणम्यव्यासंहरिंस्वजननीमथसंप्रतस्थे
ततश्चपितापुत्रसंवादानंतरम् श्रीभगवानुवा
च व्यासत्वदीयतनयः शुकवन्मनोज्ञंब्रूतेवचोभ

वतुनच्छुक एवनाम्ना हर्म्येचवत्स्यतितथापिनमा
यया ऽयं स्पृष्टः पथोममकृष्णाहृदिमास्यश्लोकं यामो
गृहंवयमपिप्रकुरुष्ववाक्यंयत्वामयंपरमभावय
तोभ्युवाचेत्यादि इत्थंजगत्त्रयगुरुः पुरुषोत्तम
स्त्वंसंवोध्यवोधनिधिमाथुरप्याब्धिरूढः आनं
र्त्तभारतकविंद्विजवर्यमस्त्वैस्तां द्वारकांसुरपुरींद्रु
तमाजगामेतिब्रह्मवैवर्त्तपुराणोक्तो योसौपरीक्षि
तंप्रतिश्रीमद्भागवतमुक्तवान् पुराणानांकल्पभे
देनैवस्थितिस्कन्दपुराणादावुक्तमेव अन्यथासर्वे
षांपुराणानामप्रामाण्यंस्यात् परस्परादिविरु
द्धत्वान्महाभारतादीनामपीतिविद्वद्भिराकल
नीयमितिकिंवहुना ॥

अन्येपिदोषास्सन्तिनवासन्तिवहवो
दोषाः एकदोषवतोपिग्रन्थस्यप्रामा
ण्यंनभवति कुतोवहुदोषवतश्च त
स्मात्तस्यालीपोलाकन्यायवत्सारद्
स्तावद्द्रष्टव्यः ज्ञानंपरमगुह्यंमेयद्वि
ज्ञानसमन्वितं सरहस्यंतदंगंचगृहाण
गदितंमया परंगुह्यंयदस्तिज्ञानंतद्विज्ञा
नमेवभवति पुनर्विज्ञानसमन्वितमिती
दंव्यर्थमेव एवमनुइडेलाकथम्भवास्ति ।

परमगुह्यंज्ञानंविज्ञानमेवेति किंतज्ज्ञत्राह्यास्ति
नहिपरमगुह्यंज्ञानंविज्ञानस्यवाचकम् श्लोका
र्थस्तुमेममभगवतोज्ञानंशब्दद्वारायाथार्थ्येनि
र्धारितंपरोक्षंमयागदितंसरहस्यं तच्चकलुष।
चित्तानांभागवतादिनिन्दकानांनास्तिकानांन
सम्भवति आस्तिकानांशुद्धचित्तानांकिञ्चित्सं
भवति विज्ञानमपरोक्षानुभवोमत्स्वरूपस्यया
थार्थ्ये नसाक्षात्कारस्तेनसमन्वितं संयुक्तंतच्च
यत्यतःपरमगुह्यंनिर्गुणब्रह्मज्ञानादपिश्रेष्ठ
त्वाद्रहस्यंतमम् किन्तुसरहस्यंरहस्यंयत्किम।
प्यस्तितेनापिसहितंतच्चप्रेमभक्तिरूपम् चपुनः
तदंगंतस्यरहस्यस्यअंगंसाधनभक्तिरूपमिति
एवंचचतुश्लोक्यप्युद्धास्तीतिवदन्महाव्यंसकः

कश्चिद्विबोधएव

जन्माद्यस्ययतोन्वयादि॰ यतःकुतइतिप्रष्ट
व्यः कर्मणोवाकालादाहोस्विदीश्वराद्वा
कामादाहोस्वित्प्रकृतेर्वाब्रह्मणः किञ्चिद
पिस्पष्टंप्रकृतंनदर्शयते।तएवसर्वमशुद्धंकथनम्

जन्माद्यस्ययत इतिव्याससूत्रे यतोवाइमानिभूतानि
जायन्तइत्यादौवेदेपि यतःकुतइत्यादित्वदीयाशं।
कासंभवस्ततस्तस्याप्यशुद्धत्वंतवप्रतारकस्यमते।

स्यात् ननु अथातो ब्रह्मजिज्ञासेति पूर्वं प्रकृतमिति नात्र
शंकावसर इत्युच्यते तर्ह्यत्रापि तत्परं सत्यं धीमहि य
तोऽस्य विश्वस्य जन्मादि इति संबंध इत्यद्वैतवादिभि
रस्य श्लोकस्य व्याख्यानावसरोक्तप्रकारेणार्थक्र
मेण पूर्वं प्रकृतमस्त्येवेति आत्मा वारे द्रष्टव्यः श्रो
तव्यो मंतव्यो निदिध्यासितव्य इत्यादौ आर्थक्रमे
णाशाब्दक्रमस्यत्यागस्तु सर्वानुभवसिद्धः शाब्दक्र
मेणैव पूर्वं प्रकृतमपेक्षितमिति किं कस्यचिद्राज्ञ
आज्ञास्ति किंच तत्पदप्रतिपाद्यतया वक्तृबुद्धिविष
यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने यत्पदस्य
शक्तिः अत एव यत्पदेनार्थप्रत्यायने नियमतस्तत्प
दापेक्षा तत्पदसमभिव्याहारज्ञानं विना उक्तानुगम
कधर्माग्रहेण शक्तिपरिच्छेदस्यैवासंभवादिति ए
वंचनात्र शंकापंककलंकलेशोपीति सर्वमस्पष्ट
मिति कस्यचिदुन्मत्तस्य कथनमेवातीवाशुद्धमि
तिसुधियो विभावयंतु ॥ ॥

भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव व
सिस्सम्प्रसारिणीति महाभाष्यम् संवत्स
रोषितो भिक्षुः प्राप्य पुण्यकृतांल्लोकानु
षित्वा शाश्वतीः समाः इत्युदाहरणाद्वि
प्रवसित इत्यशुद्धमेव ॥ ० ॥ ० ॥ ० ॥

वसधातोः सामान्यतः सर्वत्रसंप्रसारणमितिनुनसं ।
भवति वसति विपिन वितानेत्यत्र तिलकितधाम
इत्यादिमहाकविप्रयोगेषुवसेः संप्रसारणस्याद
र्शनात् ननुवचिस्वपियजादीनांकितीत्यनुशास
नात्वसधातोः कितिसंप्रसारणंभवत्येवनान्यत्रे
त्युच्यते तर्हि यस्याः पतिरग्निमक्षरोदेशांतरंया
स्यत्येवसाप्रोष्यत्पतिकाइतिरसमंजर्य्यांभानुद
त्तमिश्रप्रयोगेवसधातोर्ल्टडादेशेशतृप्रत्ययेसंप्र
सारणनिमित्तकस्यकित्वस्याभावेपिसंप्रसारणस्य
दर्शनात् यद्यपिप्रोष्यत्पतिकेत्यसाधुःपाठःप्रवत्स्य
त्पतिकेत्येवोचितःपाठइतिनागेशभट्टादिभीरसमंज
रीप्रकाशेउट्टंकितम् तथापिकविसंप्रदायसिद्धत्वा
त्प्रोष्यत्पतिकेत्येवपाठःसाधुरितिमैथिलावदंति ए
वंशास्त्रयुक्त्यामैथिलानांकथनमेवसत्यंप्रतिभाति
तदुक्तंचंद्रालोके तत्दुग्धाब्धिसंभूतेःकथंजाताक ।
लंकिता कवीनांसमयाद्विद्या[illegible]ऽऽदोषतांगता इ
ति एवंकाव्यप्रकाशे अप्रयुक्तं तथाम्नातमपिकवि
भिर्नाहृतं यथादैवतशब्दोदैवतानिपुंसिवेति पुंस्या ।
म्नातोपिनकेनचित्प्रयुज्यते असमर्थं यत्तदर्थंपठ्य
ते नचतत्रास्यशक्तिः यथाहंतीतिगमनार्थेनिहता
र्थं यदुभयार्थमप्र सिद्धेर्थेप्रयुक्तं यथाशोणितश

दस्य रुधिरलक्षणेनार्थेनोज्वलीकृतस्तपोर्थोऽवव
धीयते एवं वसंतेसर्वपुष्पसमुद्गमवर्णानं कविसं
प्रदायमिदं एवं च श्रीमद्भागवतस्य सर्वेषां शास्त्रा
णां मूलभूतत्वात् विप्रवसितइति प्रयोगकथनेन
कविसंप्रदायोपि दर्शितइतिज्ञेयम् किंच महाभार
ते निर्वप्ते चाग्निपूर्वं वै निर्वापे पुरुषर्षभेति निर्वप्ते
ऽत्र संप्रसारणाभावऽआर्षः ऽप्रोणादिकस्तन्प्रत्य
योवेतिटीकायामुक्तम् एवं पूष्णोऽहं देवयज्यया प्रज
या पशुभिश्चेति वेदेपि संप्रसारणाभावः एवमत्रापि
इत्थं च विप्रवसितइत्यादि बहूनामार्षप्रयोगाणां
दर्शनादप्यस्य श्रीमद्भागवते व्यासकृतत्वं निश्ची
यते किंच स्तोकं पचति मृदु पचतीत्यादौ क्रियावि
शेषणस्थले सामान्येन पुंसकमिति पाणिनीये क्ली
बत्वमात्रमेवोक्तम् नतु कर्मत्वमेकत्वं चेत्युक्तम् न
नु क्रियाविशेषणानां क्लीबत्वं कर्मत्वमेकत्वं चेति
व्याकरणांतरे प्रतिपादितम् एवं समानकालीनः
स्तोकंपाकः जातिमत्त्वानित्यादि पदानां मतभेदे
न साधुत्वमस्त्येव तथा विप्रवसितइत्यत्रापि ज्ञेयम्
वस्तुतः धनगताहि शिप्रेते प्रव्रजिते द्विदशासमाः प्र
वसितेवानसुत्रपौत्रैः ऋणांदेयमिति विज्ञानेश्वरोक्तौ
वसितइति प्रयोगो दृश्यते तथा [illegible]

दिगंवपेषुचेति किंबहुना इत्यंच विप्रवसितइत्यशुद्धमे
वेति कस्यचिज्जन्मांधस्यसंन्यासाभासस्य कथनमेवा
शुद्धमिति

कथितोवंशविस्तारोभवतासोमसूर्ययोः
प्रथनेवावशब्दे शब्दोपाधौविस्तरः अन्य
त्रविस्तार एव कोस्तिशब्दोपाधिः कथन
श्रवणो विस्तरेणात्मनोयोगं विभूतिंच
जनार्दन भूयःकथय० विभूतेर्विस्तरो।
मया नास्त्यन्तो विस्तरस्यमेदेवोविस्तर
शः प्रोक्तअसुरम्यार्थमेशृणु निशाम
यतदुत्पत्तिं विस्तराद्गदतोमम एवंसति
कथितोवंशविस्तारोभवतेत्यशुद्धमेव ॥

प्रथनेवावशब्दे इत्यनुशासनात् शब्दविषयेविस्तरःत
द्भिन्नेविस्तारः विस्तरोवाक्प्रपंचेस्याद्विस्तारे प्रणये
पिचेति विस्तारो विस्तृतोस्तम्बेइति मेदिनी एवंचग्रं
थविस्तरइत्यादौवाचांप्रपंचः परस्पविस्तारोऽत्रसना
स्तिकथनश्रवणरूपार्थस्यशब्दोपाधित्वात्तत्रविस्तर
इत्येवसाधुरित्यस्तुपरंच यत्रकथनश्रवणमात्रशब्दव्या
पारस्य विवक्षातत्र विस्तरइत्येवसाधुरिति यत्रतुकथन
श्रवणाशब्दजन्यार्थव्यापारस्यविवक्षातत्रविस्तारइत्ये
वसाधुरिति अन्याथापटस्यविस्तारइत्यादावशब्दो
पाधित्वात्पटस्यविस्तरइत्येवस्यात् तथाच कथितोवं

शविस्तारइत्यत्रकथितः अर्थात् साक्षाद्दर्शिनो दशरथादी
नांपुत्रपौत्रप्रपंचः तथाचवक्तुःकथनसामर्थ्याद्भूतंभविष्यंच
हृतंसर्वंकथनसमयेप्रत्यक्षंभवतीति वाल्मीकिरि ;चि
तरामायणादावुक्तं एवंनाटकादिष्वपि परंत्वयमनुभवो
भक्तानांसहृदयानांचैव ननुकपटेन काषायधारिणांभि
क्षूणांदरिद्राणां किंच सत्क्रियांदेशकालौच शौचंब्राह्मण
संपदः पंचैतान्विस्तरोहन्तितस्मान्नेहेतविस्तरमितिमनुव
चने कथनश्रवणरूपार्थाभावेपिविस्तरइतिप्रयोगोदृश्यते
एवंब्रह्मणोमानसः पुत्रोगोपतिर्नाममानवः तस्यवंश
स्यविस्तारंक्षमोवक्तुंनरःकथमितिभविष्यपुराणस्यश्लो
केकथनरूपार्थेपि विस्तारइतिप्रयोगस्यदर्शनात् अथ
वाकेवलात्स्तृधातोर्घञ्प्रत्ययेकृते पश्चाद्विशब्दयोगे वि
स्तारइतिप्रयोगोभवतिसचसमुदायशक्त्याविस्तृतरूपा
र्थस्यबोधकः ततोवंशशब्देनसमासः तथाचवंशविस्ता
रइतिसाधुप्रयोगोजायते अथवाऽयथामहाभारतेचक्र
वत्परिवर्त्तनंगृहीत्वापाणिनाकरमितिस्तोकेपरिवर्त्तन
मित्यत्रपुंस्त्वनङ्भावस्त्वार्षः एवमत्रापिवंशविस्तारइ
त्यार्षप्रयोगः एवंचकथितोवंशविस्तारोभवतेत्यत्रयुक्तमे
वेतिकस्यचिज्जन्मांधस्यकथनमेवायुक्तमिति ॥ ९ ॥

निगमकल्पतरोर्गलितमित्यादि अत्रवेदनिरूपणा
कृताहिपतितमितिवक्तव्ये गलितमित्यशुद्धम

एकादशीद्वे पंचम्यो वा त्रासम्बद्धमेव श्रुतानेति वक्तव्येपि वनेत्यत्रापि द्रुमेव ॥

निगमकल्पतरोर्गलितं फलमिति श्लोके श्रीमद्भागवतस्य महापुराणस्य वेदकल्पवृक्षस्य फलरूपत्ववर्णनेनास्य वेदरूपत्वं प्रतिपादितं वेदशब्दः ऋगादीनामिव पुराणादीनामपि वाचकः तदुक्तं सामसुकौथुमीशाखायां छान्दोग्योपनिषदि ऋग्वेदं भगवोध्येमियजुर्वेदं सामवेदमथर्वणं चतुर्थमितिहासं पुराणं पंचमं वेदानां वेदमित्यादि मनुः इतिहासपुराणाभ्यां वेदं समुपबृंहयेदिति नह्यवेदेन वेदस्य बृंहणं भवति नह्यपरिपूर्णस्य कनकवलयस्य त्रपुणा पूरणं युज्यते पूरणात्पुराणमिति चान्यत्र भविष्यपुराणे ऋग्यजुःसामाथर्वाख्यः काव्यं रामायणं तथा । भारतं पंचरात्रं च वेदा इत्येव शब्दिताः पुराणानि च सर्वाणि वेदस्थानि विदो विदुः स्वतःप्रामाण्यमेतेषां नात्र किंचिद्विचार्य्यत इति पुराणादीनामपि ऋग्वेदादिवदपौरुषेयत्वं माध्यंदिनश्रुतावुक्तम् एवं वा ऽरेस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोथर्वाङ्गिरस इतिहासः पुराणमित्यादि अपरार्के मत्स्यपुराणे मत्स्य उवाच पुराणं धर्मशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् अनंतरं च वक्त्रेभ्यो वेदा अस्य विनिर्गताः पुराणमेकमेवासीत्तस्मिन्कालान्तरेपि च त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरं

तदर्थोत्रचतुर्लक्षेसंक्षेपेणप्रदर्शितः पुराणानिदशाष्टौच
सांप्रतंतदिहोच्यते नामतस्तान्प्रवक्ष्यामिशृणुध्वमृषि
सत्तमा इत्यादि शिवपुराणस्यवायवीयसंहितायाम्
संक्षिप्यचतुरोवेदांश्चतुर्धाव्यभजत्प्रभुः व्यस्तवेदतया
लोकेवेदव्यासइतिश्रुतः पुराणमपिसंक्षिप्तंचतुर्लक्ष
प्रमाणतः अद्याप्यमर्त्यलोकेतच्छतकोटिप्रविस्तरमि
ति एवंचात्रवेदनिन्दाकृताहीतिकस्यचिद्दिक्षिप्तस्यक
थनमेव अत्रगलितमितिपदं शिष्यप्रशिष्यादिरूप
पल्लवपरंपरयाशनैरखंडमेवावतीर्णंनतुत्रुटिपा
तेनस्फुटितमित्यर्थकम् अत्रशाब्दश्लेषेणचभागव
तंरसंनामभगवत्संबंधिरसमितिज्ञेयम् तत्पक्षेगलित
मित्यनेनतस्यसुपाकिमत्वेनाधिकस्वादुत्वंदर्शितम्
शास्त्रपक्षेसुनिष्पन्नार्थत्वेनाधिकस्वादुत्वमितिज्ञे
यम् एवंचपतितमितिवक्तव्येगलितमित्यशुद्धमिति
कस्यचित्प्रमत्तस्यकथनमेवाशुद्धम् निगमकल्पतरु
पदोत्तरवर्तिनीयाषष्ठीतस्याःफलेऽन्वयः शुकमु
खादितिपंचम्याःगलितमित्यत्रान्वयः एवंचएकाष
ष्ठीद्वेपंचम्यौवात्रासम्बद्धमेवेतिकस्यचित्कथनमेवा
संबद्धम् शास्त्रपक्षेयतःश्रीमद्भागवतंरसात्मकफ
लस्वरूपमतःपिबत एवंलोकेसज्जनषट्पदैरहरहः
पेपीयमानंमुदाभूयाद्भारतपंकजमित्यत्रयदीयानां

वाचाममृतमयमाचामभिरसमित्यादावपिज्ञेयम् भगव
त्संबंधिरसपक्षेतुरसस्यपानमेवसंभवत्यतआह पिवत
इति इत्थंच अरण्येनिवक्तव्ये पिवतेत्यशुद्धमेवेति क
स्यचित्कथनमेवाशुद्धम्

नेमंविरिञ्चिर्नभवोनश्रीरप्यंगसंश्रया प्र
सादंलेभिरेगोपीयत्तत्प्रापविमुक्तिदात्॥१॥
अत्रैकोनकारःसार्थकोद्वावनर्थकौस्तोनिं
दाचकृताब्रह्मादीनांदेवक्यादीनाञ्च ॥०॥

अत्रइमंपूर्वोक्तंप्रेमपरीपाकरूपंप्रसादं नविरिंच्यः
प्रापनभवःप्रापनश्रीरपिप्रापेत्यर्थः अथवागोपी
यत्तत्प्रापतद्रूपमिमंविरिंच्यादयोनलेभिरेनलेभिरे
नलेभिरे नञ्त्रयवशेनक्रियावृत्तिः अथवानेमशब्दो
ऽर्द्धवाचकः तदुक्तंसिद्धांतकौमुद्यांनेमइत्यर्द्धेसमःस
र्वपर्य्यायइति तथाचविरिंच्यादयोनेममर्द्धमपूर्णंप्र
सादंनलेभिरेनअपितुलेभिरएवगोपीत्वित्यादिव्या
ख्येयम् अत्रैकोनकारःसार्थकोद्वावनर्थकौस्तइत्यु
क्तकथनमेवानर्थकम् अत्रयशोदायाःशुद्धवात्स
ल्यभावेनपरमोत्कर्षवर्णनम् तत्रदेवक्याऐश्वर्य्यसंव
लितभावेननशुद्धवात्सल्यभावः ब्रह्मादीनांनरा
कारपरब्रह्मणिनवात्सल्यभावः इत्यमेवप्रमेणाथ
परमाकाष्ठाप्राप्ता परित्यागावधिविरहात्तद्धि [illegible]

रूपेत्यादि मधुसूदनसरस्वतीभिरुक्तम् आदिपुराणे च तेनेब्रह्मादयोदेवावांछंतिमदनुग्रहम् अयंतुना सांगोपीनांप्रेमानुग्रहंवांछकः भावानुरूपंसर्वत्र प्राप्यंव्यवहाराम्यहम् किंतुतासुव्रजस्त्रीषुपरिक्रीतस्त्वाभिस्त्रामिति एवंचनिंदाचकृतेत्यादिकं कस्य चि।

त्निन्दकस्यकथनमेवेति

विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविं
दविमुखाच्छ्वपचंवरिष्ठम् अत्रब्राह्मणा
निंदाकृता अव्यक्तंव्यक्तिमापन्नंमन्यंते
मामबुद्धयः अस्मादिरुद्धत्वादस्तुदोऽपि।

अत्रभगवद्भक्तानां माहात्म्यवर्णनेभक्तिहीनानांनि निन्दनेचतात्पर्यम् नब्राह्मणनिन्दने एवंपद्मपुराणे ब्राह्मणः क्षत्रियोवैश्यः शूद्रोवायदिवेतरः विष्णुभक्तिसमायुक्तोज्ञेयःसर्वोत्तमोत्तमः चांडालोपिमु निश्रेष्ठो विष्णुभक्तिपरोयदि विष्णुभक्ति विहीनस्तु द्विजोपिश्वपचाधमइति क्रियायोगसारेजैमिनिं प्रतिव्यासवाक्यम् यस्मिन्कुलेद्विजश्रेष्ठजायंतेवै ष्णवाजनाः उत्तमंवानुत्तमवातत्कुलंमोक्षगामिचे ति शंकराचार्यधृतकात्यायनवचनेच वरंहुतवह ज्वालापंजरस्यांतर्व्यवस्थितिः न शौरिचिंताविमुख जनसंवासवैशसमिति नारदीयेरुक्मांगदंप्रतिवाम

देववाक्यम् श्वपचोपि महीपाल विष्णुभक्तो द्विजाधिकः
विष्णुभक्तिविहीनोपि यतिश्च श्वपचाधिक इति एवं चा
त्र ब्राह्मणानिंदाकृतेति कस्यचिन्निंदकस्य कथनमेवे
ति कृष्णस्वरूपेण प्रादुर्भूतं मां पामराः अव्यक्तं मन्यंत इत्य
र्थः अनंतफलाया हो खलु कष्टं वर्त्तत इत्यनुक्रोशान्द
र्शयति भगवान् किं निमित्तं त्वामेव न प्रपद्यंत इत्युच्यते
अव्यक्तमिति अव्यक्तं अप्रकाशं व्यक्तिमापन्नं प्रकाशं
गतमिदानीं मन्यंते मां नित्यप्रसिद्धमीश्वरमपि संतमबु
द्धयो ऽविवेकिन इति शंकरभाष्यम् उक्ते वैपरीत्ये कारण
मविवेकातिरिक्तं नास्तीत्यभिप्रेत्याह अहो खल्विति ।
भगवद्भजनस्योत्तमफलत्वेपि प्राणिनां प्रायेणानन्निष्ठ
त्वाभावे प्रश्नपूर्वकं निमित्तं निवेदयति किं निमित्तमि
त्यादिना अप्रकाशं शरीरग्रहणात्पूर्वमिति शेषः इदा
नीं लीलाविग्रहावस्थायामित्यर्थः प्रकाशस्य तर्हि क
दाचित्कत्वं भगवति प्राप्तमित्याह नित्येति कथं तर्हीत्या
दि तट्टीका एवं च अस्माद्विरुद्धत्वादशुद्धोपी ति कस्यचि
त्पामरस्य कथनमेवाशुद्धमिति ॥ ॥ ॥

कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना
पशुघ्नात् अत्र वेदविहितकर्मकर्तॄणां निन्दाकृता अ
र्थाद्वेदानामपि नास्तिको वेदनिन्दक इत्युक्तं मनु
ना अतएवायं भागवतस्यास्य कर्त्ता नास्तिकः

अत्रभगवत्कथामाहात्म्यवर्णनंतद्विमुखानांचनिन्दनं
कृतम्वायुपुराणेस्कन्दपुराणादौचैतद्विस्तरेणकथितं
तत्रैवावलोकनीयम् योगेशानंकनकशृंगमयंददानी
त्यादौ चरितंरघुनाथस्येत्यादावपितथैवोक्तम् अत्रवेद
विहितेत्यादिकथनंतुकस्यचिद्दुष्टस्यैव यतोवेदव्यास
स्यवेदरूपस्यास्यश्रीमद्भागवतस्यचायंनिन्दकोऽतो।
मनुवचनान्नूनमयंनास्तिकएवेति ॥ ॥ ॥

यद्वाग्विसर्गोजनताघविप्लवोयस्मिन्प्रतिश्लो
कमबद्धवत्यपि० असम्बद्धोयंश्लोकः ॥

अत्रापशब्दादियुक्तेपिवाचांप्रयोगेयस्मिन्भगवतोना
मानिसंति सकलमघघ्नः चित्रपदादियुक्तेपियत्रभगव
तोनामानिनसंतिसतुनपापघ्नः लौकिकभाषायामपि
भगवतोनामकीर्त्तनादिकं पापनिवर्त्तकमितितदुक्तं।
मात्स्येदंष्ट्रिदंष्ट्राहतोम्लेच्छोहारामेतिपुनःपुनः उक्त्वा
मुक्तिमवाप्नोतिकिंपुनःश्रद्धयागृणन्निति इत्यंचास
म्बद्धोयंश्लोकइतिकस्यचिद्दुर्जनस्यकथनमेवासम्ब
द्धमिति

व्यासनारदसंवादेव्यासस्यापिनिंदाकृताव्यासः
शोकातुरोऽभूत्तत्रनारदआगतः पुनर्नारदेन
बोधितइतिव्यासस्तुनारायणावतारस्त
स्यकथंशोकःसंभवेत्

ऽत्रप्राधान्यतोभगवद्यशोऽवर्णनेनव्यासस्यशोकातु
रत्वंकात्वन्येषांवार्त्ता नारदेनभगवद्भक्तिवर्णनेप्रेरितो
व्यासस्तद्दर्शनेनविशोकः सन्परमानन्दंप्राप्तवान्
ऽप्रतोभगवद्भक्तिः शोकनाशिनी ब्रह्मज्ञानादपिप
रमानंददायिनी तितात्पर्य्यम् किंच यथामहाभार
तेपुत्रवियोगेनव्यासस्य शोकातुरत्ववर्णनम् यथावा
वाल्मीकिविरचितरामायणेरघुनाथस्यसीताविरह
जदुःखेनशोकातुरत्वकथनंमनुष्यदेहधारणेन त
द्व्यवहारनटनाभिप्रायेणतद्वत्रापिज्ञेयम् यथावा
वाल्मीकिविरचितरघुनाथचरितेयुद्धकाण्डेयुद्धपरि
श्रांतंचिंतयास्थितंरामंप्रत्यगस्त्योपदेशोलोकानुग्र
हाय एवमत्रनारदोपदेशोपिलोकशिक्षणायैवेतिज्ञे
यम् एवंचात्रव्यासनिंदाकृतेतिकस्यचिन्निन्दकस्य
जन्मांधस्यशठस्यैवकथनमिति ॥ ० ॥ ० ॥ ० ॥

भस्मासुरकथायांशिवस्यापिनिंदाकृताभस्मासु
रभयाच्छिवः कैलासंविहायवनंगतवान्पुन
र्विष्णुनारक्षितइतिकस्मादपित्रैलोक्येभयंन
संभवतिशिवस्ययदिकश्चिद्ब्रूयात् दत्तवराय
भस्मासुरायदण्डनदत्तवानितितर्हिशिवरणा
यदत्तवरायशिवेनदण्डः कथंदत्तः यस्यक्रो
धलेशेनसर्वंपंचभूतात्मकंजगद्भस्मीभूतं

भवतितस्यभयंकर्तैकःसमर्थःपुमान्भवेत्
अत्रसत्वतनोर्विष्णोरुपासनयाजीवानांश्रेयांसितेनेतरे
षांदेवानामुपासनयेतिविष्णोरुत्कर्षवर्णनेचेतितात्प
र्य्यम् तदुक्तमादिपुराणे नजानातिनरोमूढः किंदेवैः
सेवितैःसुखम् स्वलांगूलंसमाश्रित्यकोहितीर्णोऽम्बु
धेर्ज्जलम् येऽधमाःपापकर्माणोदेवतांतरसेवकाः
कामिनोविष्णुविमुखास्तेयांतिनरकेध्रुवम् पतित्य
क्तायथानार्य्योजारंसुखलवेक्षया भजन्तिलोकेनिं
दान्ताःप्राप्यंत्यधमांगतिं देवाश्चकर्मसचिवाः के
वलंनहितेरताः अपराधेकृतेऽल्पेपिदेहदविणनाश
काः येयैःसंसेवितादेवास्तेवतेषांसुखंध्रुवम् सदेवस
र्यसंसेव्यंगुरोबाणोभवत् शिवसेवांसमासाद्यक्षयं
प्रापवृकासुरः बाणोबाहुसहस्रस्यनाशंकृष्णादवा
पह विश्वरूपःसुरपतिंसंतोष्यनिधनंगतः आराधन
विरोधाभ्यांदेवैर्नाशोहिदृश्यते विपरीतमिदंविष्णाव
भाभ्यांमुक्तिभाग्भवे दिति एवंभगवदुपासनयेवनिः
श्रेयसाधिगमोजीवानांनदेवतांतरोपासनयेतिहरिवं
शेकाशीखंडेचघंटाकर्णकथाप्रसंगेस्पष्टमेवोक्तंनि
स्तरेणतत्रैवावलोकनीयमिति महाभारतेव्यासवा
क्यम् आलोड्यसर्वशास्त्राणिविचार्य्यचपुनःपुनः
इदमेकंसुनिष्पन्नंध्येयोनारायणःसदेति हरिवंशे

ह्मादेववाक्यं हरिरेकः सदाध्येयो भवद्भिः सत्वसंस्थितैरि
ति पाद्मे यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः समत्वेनै
ववीक्षेत स पाषण्डी भवेद्ध्रुवमिति स्कांदे शिवशास्त्रे
युतद्ग्राह्यं भगवच्छास्त्रयोगियदिति आदिवाराहे।
जन्मांतरसहस्रेण समाराध्य वृषध्वजम् वैष्णवत्वं
लभेद्धीमान् सर्वपापक्षये सतीति सत्वैकस्वभाव
स्येश्वरस्य नंदनंदनविग्रहेऽतिशयेन सत्वमभिव्य
क्तं अत एव तस्मिन्निरतिशयं धर्मज्ञानवैराग्यैश्वर्या
दिकमस्ति कामक्रोधाऽभिमानि देवताविग्रहे तु स
त्वं तिरोभूतम् औपाधिकं लोभप्रवृत्त्यादिकं प्रमाद
मोहादिकं चाविर्भूतमिति महाभारतटीकायामिति न
सिंहतापिन्यां रुद्रजापकशतमेकमथर्वागिरसशिखाध्याप

केन तत्समं अथर्वागिरसशिखाध्यापकशतमेकं मंत्र
राजाध्यापकेन तत्सममित्याद्यनेकवचनानां च विष्ण्वारु
त्कर्षवर्णने तात्पर्यम् न तु शिवनिंदने निंदनं तु सर्वथा
परिहर्तव्यमेव तदुक्तं भगवता यो मां समर्चयेन्नित्यमे
कांतं भावमास्थितः विनिंदन्देवमीशानं स याति नरकं।
ध्रुवमिति भस्मासुरभयाच्छिवस्य पलायनं तु विषवृक्षो
पि संवर्ध्य स्वयं छेत्तुमसांप्रतमिति न्यायेन एवं श्रीभगव
तः कृष्णस्य कालयवनात्पलायनादावपि बोध्यम् कै
लासोत्पाटने दत्तवराय रावणाय शिवेन योऽदरोऽदत्तः

सनुरावरास्यहितायैवेति ततः प्रीतो महादेवः शैलाग्रे वि
ष्ठितं प्रभुः मुक्त्वा चास्य भुजान् रामः प्राह वाक्यं दशानन
म् प्रीतोस्मि तव वीरस्येत्यादि वाल्मीकिरचितरामचरित्र
स्योत्तरकाण्डस्थमुक्तम् अथवा भस्मासुरभयात्पला
यनं रावणास्य दण्डदानमिति स्वतन्त्रेच्छस्य नियोगपर्य्यनु
योगानर्हस्य महादेवस्य इच्छैव नियामिकेति बोध्यम्
इत्थं च भस्मासुरकथायामित्यादिकथनं कस्यचिन्म
हामूर्खस्यैवेति ज्ञेयम् ॥

बाणासुरकथायामपि शंकरस्य निंदा कृता
कृष्णेन शंकरः पराजित इति कोपि शंकरं
पराजेतुं समर्थो नास्ति

अत्र श्रीकृष्णात् शंकरपराजयवर्णनं एवं वाल्मीकिरा
मायणस्य बालकाण्डे तदा तु देवताः सर्वाः पृच्छन्ति स्म
पितामहं शितिकण्ठस्य विष्णोश्च बलाबलनिरीक्षया
अभिप्रायं तु विज्ञाय सदेवानां पितामहः विरोधं जनया
मास तयोः सत्यवतां वर विरोधे तु महायुद्धमभवद्रोमहर्ष
णम् शितिकंठस्य विष्णोश्च परस्परजयैषिणोः तदा तु
जृंभितं शैवं धनुर्भीमपराक्रमम् हुंकारेण महादेवस्तं
भितोऽथ त्रिलोचनः देवैस्तदा समागम्य सर्षिसंघैः स
चारणैः याचितौ प्रशमं तत्र जग्मतुस्तौ सुरोत्तमौ जृंभितं
तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः अधिकं मेनिरे विष्णुं

देवाः सर्षिगणास्तथेत्यादिभिः समरेशंकरादिष्मोराधिक्यवर्णनमस्त्येवेति एवंमहाभारतस्य शांतिपर्वणापि इत्यंचवाणासुरकथायामित्यादिकथनंत्वज्ञानमूलकमेवेति

गृहस्थानामपिनिंदाकृताकपोतगुरुकरणकथायां॰गृहस्थाश्रमो॰श्रेष्ठ इति यथानदीनदाः सर्वेसागरेयांतिसंस्थितिम् तथैवाश्रमिणः सर्वेगृहस्थयांतिसंस्थितिम् श्रेष्ठ एव गृहस्थाश्रमोव्यवहारे॰तो॰श्रेष्ठ इतिकथनंयत्तत्प्रमत्तगीतमेव ॥

॰आश्रमांतरसाध्यंज्ञानंगृहस्थेनसाधयितुंशक्यंनतुगृहस्थेनसाध्यंयज्ञादिकं॰आश्रमांतरेष्वस्तीतिकृत्स्नोधर्मोगार्हस्थ्य एवप्राप्यते संन्यासिनांगृहस्थगृहेविहितंभोजनादिकं गृहस्थः स्वात्मानमन्यांश्चपित्रादीन्तारयति यतींश्च पुष्णाति यतिस्त्वात्मानमेवतारयतिनपित्रादीन् पोषणं चस्वस्यापिनकरोतिभिक्षोपजीवित्वादतो गार्हस्थ्यमेव श्रेष्ठमितिमहाभारतादावुक्तम् सर्वाश्रमानुपादायस्वाश्रमेणकलत्रवान् व्यसनार्णवमत्येतिजलयानैर्यथार्णवमित्यादिवाक्यैः श्रीमद्भागवतेच परंचतत्रगृहासक्तिर्नकार्याकपोतगुरुकरणकथायांः गृहासक्तिस्तिर्श्चामप्यनर्थहेतुर्मनुष्यस्यत्वितिनिंदितेतितात्पर्यमिति इत्यंचगृहस्थानामपिनिंदाकृतेत्यादिकं कस्यचिद्भिक्षुकपरास्यवान्ताशिनः कथनमसंबद्धम् ॥०॥

कृष्णस्यापिनिंदाकृतारासमण्डलचौरलीला
कथायाम् परस्त्रीभिर्लीलांकृतवान् कृष्णःनग्न
दाराहृष्टवांश्चेति अदत्तानामुपादानं हिंसाचैवा
विधानतः परदारोपसेवाचशारीरंत्रिविधंस्मृतं
पापमितिशेषः नाग्निंमुखेनोपधमेन्नग्नां
नेक्षेतचस्त्रियमित्याहभगवान्मनुः अस्मा
द्विरोधाल्लोकाविरोधाच्चप्रमत्तगीतमेतत् ।

रासलीलावर्णनम् ब्रह्मवैवर्त्ते गर्गसंहितायांपद्मपुरा
णे आदिपुराणेविष्णुपुराणेहरिवंशे आदिवाराहे वृह
द्गौतमीयतंत्रे गौरीतंत्रे अग्निपुराणे विष्णुतंत्रे गोपाल
तापिन्यांब्रह्मसंहितायांकृष्णयामले विष्णुयामले त
थान्येष्वार्षग्रंथेष्वस्ति तथामधुसूदनसरस्वतीकृतभ
गवद्भक्तिरसायने आचार्यकृत प्रबोधसुधाकरे माधव
पुरी विष्णुपुरी प्रभृतिग्रंथेषु तथागीतगोविंदप्रभृति
काव्येषु मुरारिनाटकादिषुतथाधर्मशास्त्रनिबंधेषुक्र
मदीपिकादिमंत्रशास्त्रग्रंथेष्वस्त्येव किंचशंकराचा
र्यैः गोपीमण्डलगोष्ठीभेदमितिगोविंदाष्टके गोपीनां
मंडलंसमूहस्तेनसहगोष्ठीभेदः क्रीडाविशेषोयस्यस
तथोक्तस्तंरासक्रीडारतमित्यर्थ इतिटीकाकारेणच
रासलीलावर्णिता एवंतत्रैवस्नानव्याकुलयोषिद्वस्त्र
मुपादायागमुपारूढं व्यादित्संतीरथ दिग्वस्त्राउपादा

नुमुपकर्षेतमिति स्नानार्थंजलक्रीडार्थंव्याकुलाः संभ्रांता योषितस्तासां वस्त्रमुपादाय स्वीकृत्य अगंवृक्षं। अगवृक्षवत्लीलाकदंववृक्षमधिरूढमुच्यत इत्यागमवचनात् कीदृग्विधमित्याह दिग्वस्त्रा इति दिगंवराः अत एव वस्त्रंव्यादित्संतीः विशेषेण दातुमिच्छंतीः तायोषितः उपसमीपे आकर्षंतं स्वनिकटमानयंतमित्यनेन चौरलीलातैः प्रतिपादितैवेति स्मृतिकारोक्त परदारोपसेवनादिकं मनुष्याणां पापावहं न तु देवानां तदुक्तं महाभारततात्पर्यविनिर्णये ननु वेदविरुद्धमेकस्या बहुभर्तृता नैकस्यैव बहवो नेकाद्वौ पती इति च श्रुतौ नैकस्यैव बह्व्यस्सह पतय इति तस्मान्नैकाद्वौ पती विंदते इति च विशेषः अग्नीन्यंचक्रमात्प्राप्य हव्यमेति मनुष्यतां अग्नयस्त्वग्निरर्कः स्मापुरुषो योषिदित्यपि अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः द्रोणो वह्निश्चतुष्कोस्या योषिदग्नेरभावतः अग्निवयोस्थिता सीता भूत्वा पित्रोरभावतः अग्निद्वयोस्थिता देवानस्पृशांतिक्षितिं हि ते देवजाः पार्थमाद्रयाभूद्युमराप्यग्निवर्जिताः एकाग्निजातो वसुनो द्रुपदस्य सुराधिकौ सर्वे सर्वात्मका देवा विराजो वयवा यतः सर्व एव समाः सर्वेनंता इति हि वेदगीः नतेषां व्यभिचारोस्ति न चे

स्त्वर्यमोकथं पितापुत्रौसतींकुंतीमुपेयातांसुगतमो
द्रौपदींदेवजांपार्थादेवजायदिभुंजते नतेषामत्रदोषो
स्तिदेवाएवहिनेस्वयम् अपतेनहिवैदेवान्पापंगच्छति
सर्वथा तस्माद्यज्ञैर्देवभावंप्रार्थयीत निरेनसं एतदेवा
हिकेव्यासोनानाख्यानोपबृंहणैः दर्शयामासलोका
नांसंशयस्यापनुत्तयइति एवमात्मज्ञानिनःपापकर्म
नलगतितदुक्तंवेदे तद्यथापुष्करपलाशआपोनश्लि
ष्यंते एवमेवैवंविदिपापंकर्मनश्लिष्यतेनकर्मणालि
प्यतेपापकेनतत्सुकृतदुष्कृतेविधुनुते एतंहवावनतप
तिकिमहंसाधुनाऽकरवंकिमहंपापमकरवमिति ए
वंमद्भक्तोवानपेक्षकइत्यादिकथनाद्भगवद्भक्तोपिवि
धिनिषेधातीतइति इत्थंचयदिदेवादीनामपिव्यभि
चारादिकंकर्मनदोषावहं किमुतपुनःश्रीकृष्णस्यप
रब्रह्मणःसकलदेवानामादिकारणस्यव्यभिचारशं
केतिज्ञेयम् एवंशंकरस्यवृषभपृष्ठआरोहणम् प्रे
तैःसहसंवासः शवशयनेषुक्रीडनम् शवदाहभस्म
नोंगेषुधारणम् मनुष्यकपालमालापरिधानम् रुद्र
द्रुंगधारणमित्यादि यत्स्कंदपुराणादिषुवर्णितं वा
त्वातपःप्रेतधूमोवर्ज्यभिन्नंतथासनम् सविनाशंरुज
स्तामुसत्वकोऽशुचिरेवचेत्यादि मनुवचनविरोधात
स्यापितवभ्रमतस्यमहामूर्खस्यमतेभ्रमत्तगीतंस्या

इतिकिंबहुना

आप्तकामोयदुपतिःकृतवान्वैजुगुप्सितम्कि
मभिप्रायएतन्नःसंशयंछिंधिसुव्रत अत्रापि
कृष्णस्यनिंदाकृतासर्वज्ञःकृष्णःकदाचिज्जु
गुप्सितंकर्मनकुर्य्यात्

अत्रशिष्टानांचेतसस्तुष्टिर्धर्मेप्रामाण्यमभून्नेशाकुंतला
मीहमानंदुष्यंतस्यमनोयथेतिमहाभारततात्पर्य्यविनि
र्णयोक्तदिशायदिशिष्टानांमनोप्यसन्मार्गगोऽभिनि
विशतेतदापरमेश्वरस्यश्रीकृष्णस्यनिंद्यकर्मसंभावना
तुदूरापास्तैवेतिशास्त्रतत्वविदांराज्ञश्चसिद्धांतएवपरं
चतत्रत्यानामनवहितानांकेषांचिच्छंकायापनुत्तये आप्त
कामइत्यादिनाराज्ञःप्रश्नःअतएवनइतिबहुत्वकथन
मनदीयप्रश्नानुरोधेनैवोत्तरयतिश्रीबादरायणिःकर्मा
दिपारतंत्र्यरहितानांसमर्थानांधर्मव्यतिक्रमोयोदृष्टः
तथातेषांनिर्भयत्वंचयदृष्टंतत्त्वतेजीयसांप्रत्यवायायन
भवतियथाऽग्नेःसर्वभुक्त्वंनोऽपावित्र्यायधर्मव्यतिक्र
मादिमयमीश्वराचरितमसमर्थोनिश्चयेनकदाचिदपि
एकांशेनापिमनसापिनाचरेत्आचरन्लोकद्वयदुः
खित्वादिप्रकारेणनश्यति अनीश्वरोमौढ्यात्कालकूट
विषभक्षणोसद्योनश्यदेव नेश्वरःईश्वरस्तुप्रत्युतऐश्वर्य
विशेषप्रकाशादिनाशोभतेयथानीलकण्ठत्वादिना ।

महादेवः बुद्धिमद्भिरीश्वराणामाज्ञाप्रमाणत्वेग्राह्या नेत्याम्नाचरितं कुत्रचिनदाज्ञानुसारेणनदाचरितमपि अहंकाराभावेनकर्मभिरलेपादतोनिरहंकारिणांनपु णाचरणेनाऽर्थः नवापापाचरितेनाऽनर्थः यदिनिरहं कारतामात्रेणैवपुरायपापसम्पर्काभावादनर्थाभाव स्तर्हिपरमेश्वरस्यसर्वेषांजीवानांनियन्तुः श्रीकृष्णस्य कुतोऽनर्थशंकापीत्यादिज्ञेयमदसिष्टस्यशातंपुत्रान्ना शयामासकौशिकः तेनैवबाधिरेब्रह्महत्यास्तास्तप सोबलादितिमहाभारततात्पर्यविनिर्णयेप्युक्तमद स्मात्कृत्रापिकृष्णस्यनिंदाकृतेतिकस्यचिन्महापा

मरस्यैवोक्तिरितिज्ञेयम्

सुभद्राहरणकथायांकृष्णार्जुनसुभद्राणां निंदैवकृताकृष्णः कपटरूपिणमर्जुनंमह्य त्मास्तीतिकथितवानितिअर्जुनः कपटरूपं कृतवानितिसुभद्रापिनिंदितंकर्मकृतवतीति

स्यमेवकथात्वतिविस्तृतामहाभारतस्यादिपर्वण्यस्ति तत्रापिकृष्णादीनांनिंदाचकृताऽतोमहाभारतेनव्यास कृतमितित्वयोक्तमेतनवाच्यमतत्रकथायांतात्पर्यमिति दंशेपमनज्ञातीनांवचः अेदयंवरेश्रेयस्यपागते इतीवकृ ष्णोविजयेस्वस्वसारमहारयदितिअर्जुनस्यमातुल कन्यापरिणयनेतुआयाहिंद्रपथिभिरीडितेभिर्यज्ञ

मिमंनोभागधेयंजुषस्वत्त्मांजहुर्मातुकस्येवयोषाभाग
स्तेपैतृष्वसेयीवपामिवेतिमंत्रलिंगात्योषापत्यंमातु
लीयंयथाभागःपितृष्वसुःपुत्रस्येवंवपांनेंद्रंजुषस्वेंद्र
त्पृषिर्जगाविति

इंद्रस्यापिगोवर्द्धनोद्धरणकथायांनिं
दाकृतार्द्रोलज्जितोवभूवेति ॥

इयंगोवर्द्धनोद्धरणरूपाकथानुविष्णुपुराणोपाख्यानरख
ण्डेगोपालतापिन्यांहरिवंशपुराणादावपिवर्णितागोविं
दोगोविदांपतिरित्यस्यव्याख्यायामाचार्य्यैःअहंकिलें
द्रोदेवानांत्वंगवामिंद्रतांगतःगोविंदइतिलोकास्त्वांस्तो
ष्यंतिभुविशाश्वतमित्युक्तम् अप्रमेयात्मामहाद्रिधृगित्य
स्यव्याख्यानेचमहांतमद्रिंगोवर्द्धनंगोरक्षणेधृतवानि
तिमहाद्रिधृक्इतितैरेवप्रतिपादितम् किंचशंकराचार्य्यैः
र्गोविंदाष्टकेगोपालंप्रभुलीलाविग्रहगोपालंकुलगो
पालंगोपीखेलनगोवर्द्धनधृतलीलालालितगोपालमि
त्यनेनगोवर्द्धनोद्धरणलीलावर्णितागोपीभिःसहविह
रणंतदर्थवनंप्राप्तेवृष्टिभयनिवारणायगोवर्द्धनगिरेर्धृ
तिरकारिसैवलीलातस्मात्प्रयत्नसाध्यत्वाभावालीलया
लालिताःपालितागोपालायेनसतथोक्तस्तमितितट्टी
कायांचप्रतिपादितम्इत्थंचेंद्रस्यात्रनिंदाकृतेतिसर्वत्रै
वत्वयाबुद्धिशून्येनवक्तव्यमिति

अष्टाशीतिसहस्त्राणामृषीणां महात्मनां
निंदैव कृता समाहात्म्यान कथायाम् तेषांम
ध्ये एको पि परिक्षितं समाधानुं समर्थो नेति

महाभारतादौ सर्वेष्वपि पुराणेषु सूतशौनक संवादो व
र्ततेतत्रापि त्वयादुष्टेन वक्तव्यं शौनकादीनामृषीणाम
त्र निंदैव कृता तेषां मध्ये एको पि न पुराणादीनां ज्ञाता य
तः सूत एव पुराणवक्तृत्वेन तैः स्वरीकृत इति वस्तुतः प्रकृ
ते श्री शुकदेवस्य माहात्म्य वर्णने तात्पर्यं न तु मुनीनां
निंदायामिति इत्थं चात्र मुनीनां निंदैव कृतेति कस्य चि
त्प्रमत्तस्य प्रलपनमेवेति ज्ञेयम्

ब्रह्मणो ऽपि वत्सहरणाहंसावतरणाकथायां निंदे
व कृता अज्ञानी ब्रह्मेति ततः पुष्करतः स्वदुस्सर्व
ज्ञो मूर्तिमान्प्रभुः ब्रह्मा वेदमयस्साक्षात्प्रजापति
रच्युत इति महाभारतविरोधात्प्रमत्तगीतमेतत् ।

ब्रह्मा रूपवतीं पुत्रीं संध्याख्यां यौवनोन्मदां ततः पुत्रीमु
पाहूयसमालिंग्य पुनः पुनः ततो ति क्रीडितां संध्यामृगी
जाता ततः परं स्वयमेव विधिर्मृगो भूत्वा तं ददर्श ततो हरः ततः
पिनाकमाकृष्य विधिं हंतुं दुर्धरम् रभसेन शरं तस्मिन्मु
मोच स शरस्ततः प्रविवेश विधेर्देहं निर्गतश्च स देहतः त
तस्त द्रभसेनैव निहतः स चतुर्मुख इति शिवरहस्ये स्कंद
पुराणादौ च वर्णितम् तत्रापि ब्रह्मा वेदमयः साक्षादिति

महाभारतविरोधात्प्रमत्तगीतमेतदितित्वयाउक्तिमूर्ध्ने
नवक्तव्यमितिनतुतत्रमहादेवोदुर्ईतान्ब्रह्मादीनित्येवं
शिक्षयतिकिमुतान्यानितिनात्पर्य्यएवमत्रापिदेवादी
नामपिदर्पदलनंभगवताकृतमन्येषांकावार्त्तेतिज्ञेयम्
किंचत्रिपुरासुरवधेमहादेवरथस्यब्रह्मासारथिःसो
मसूर्य्यौरथचक्रेइत्यादिशिवपुराणादौवर्णितंतत्रापि
ब्रह्मादीनांनिंदैवात्रकृताऽतःप्रमत्तगीतमेतदितित्व
याभराडेनवक्तव्यमिति

धर्मेचार्थेचकामेचमोक्षेचभरतर्षभयदिहा
स्तितदन्यत्रयन्नेहास्तिनकुत्रचित्महाभार
ताद्विरुद्धंयत्तत्तव्यासप्रोक्तमितिमहाभार
तेइदंतुभागवतंमहाभारताद्विरुद्धमेवास्ति
तस्मात्प्रमत्तगीतमेव

श्रीमद्वाल्मीकिविरचितरघुनाथचरितेतद्रामवाणाभि
हतंपपातरक्षःशिरःपर्वतसन्निकाशम्बभंजचर्यागृह
गोपुराणिप्राकारमुच्चंतमपातयच्चेत्यादिनारामात्कुंभ
कर्णवधउक्तःमहाभारतेतुतंब्रह्मास्त्रेणसौमित्रिर्द्दारा
द्रिवरोपमम्सपपातमहावीर्य्योदिव्यास्त्राभिहतोरणे
तंदृष्ट्वावृत्रसंकाशंकुंभकर्णंतरस्विनंगतासुंपतितंभू
मौराक्षसाःप्राद्रवन्भयादित्यादिनालक्ष्मणात्कुंभकर्ण
वधोवर्णितइतिइत्यंचवाल्मीकिनिर्मितरामायणम

पिभारतादिरुद्धमेवतस्मात्प्रमत्तगीतमेवेतित्वयानि
रयगामिनावक्तव्यम् एवंमार्कंडेयपुराणेपक्षिविशे
षाणांमराडानुपरिप्रश्नेपतनस्साकथाकथिता
महाभारतेतुसानास्तितत्रापित्वयाधूर्तेनवक्तव्यंभा
रतविरुद्धंमार्कंडेयपुराणमतोनव्यासकृतंकिंतुप्रम
त्तगीतमेवेति एवंकाशीखराडादिष्वपिज्ञेयमिति

वंदेमहापुरुषतेचरणारविंदम् ध्यामूर्द्धानंय
स्यविप्रावदंतिखंवैनाभिंसोमसूर्य्योचनेत्रेदि
शः श्रोत्रेयस्यपादौक्षितिश्चध्यातव्योऽसौ
सर्वभूतांतरात्मा॥१॥यद्वाचानभ्युदितंयेनवा
गभ्युद्यतेतदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते
॥२॥यन्मनसानमनुतेयेनाहुर्मनोमतम् तदे
वब्रह्मत्वंविद्धिनेदंयदिदमुपासतइत्यादिभ्यः
श्रुतिभ्योविरुद्धंचरणारविंदवंदनादिकमेवातो
ऽकथनीयमश्रवणीयञ्चेदंप्रमत्तगीतंभागवतम्

एकोपिकृष्णस्यकृतःप्रणामोदशाश्वमेधावभृथेनतु
ल्यः दशाश्वमेधीपुनरेतिजन्मकृष्णप्रणामीनपुनर्भ
वायेतिमहाभारते नत्वाकृष्णपरंदेवम् चुर्गङ्गदयागिरे
तिगर्गसंहितायां नमस्करोतिमूर्द्धायंवाचास्तौतिनिरंत
रमितिवायुपुराणे यत्पादपंकजगतामचलांचभक्तिंवां
च्छंतीतिपुराणादिषु ओंनमोविश्वरूपायविश्वस्थितसं

तेहेतवइत्यादितापनीयश्रुतिषु पाद्मे तपस्तप्तानरैर्घोर
मरण्येपनियतेंद्रियः यत्फलंसमवाप्नोतितंनत्वागरुडध्व
जमिति ब्रह्मवैवर्त्ते शरणागतरक्षणोद्यतंहरिमीशंप्रण
मंतियेनराः नपतंतिभवांबुधौस्फुटं पतितानुद्धरतिस्मता
न्साविति नारसिंहेश्रीयमोक्तौतस्यवैनारसिंहस्यविष्णोर
मिततेजसः प्रणामंयेपिकुर्वंतितेषामपिनमोनम इतिवि
ष्णुपुराणे पादपद्मंप्रणमतीत्यादिचपदनखनिविष्टमू
र्त्तिभिरितिमधुसूदनसरस्वती एवंवामनस्यविष्णोश्चर
णारविंदवंदनंपुराणादिषुप्रसिद्धं एवंगोविंदाष्टकेशंक
राचार्य्यैःरासक्रीडायांदेवगणैः श्रीकृष्णस्यचरणवंदनकृ
तमितितट्टीकायांचवृंदावनभुविवृंदारकगणावृंदाराधितवं
देहंकुंदाभामलमंदस्मेरसुधानंदंसुहृदानंदंवंद्याशेषम
हामुनिमानसवंद्यानंदपदद्वंद्वंवंद्याशेषगुणाब्धिंप्रणम
तगोविंदंपरमानंदमितिवृंदावनभुविवृंदारणप्रदेशेरा
सक्रीडायांसंप्रवृत्तायांवंद्याश्चतेऽशेषामहामुनयश्चते
वंद्याशेषमहामुनयोनारदाद्यास्तेषांमानसेनहृदयेनवंद्य
ध्येयमानंदपदद्वंद्वंयस्यसतथोक्त इति एवंश्रीरामा
नंदसरस्वतीभिरपिसीतारामपदद्वंद्वमद्वंद्वानंदसाध
नम्नमामियद्व्रजोयोगात्पाषाणोपिसुखंगतइतितद्व
र्णितं इत्थंचयदाचानभ्युदितमित्यादिश्रुतिविरुद्धं
चरणारविंदवंदनमित्यादिकं कण विहितसितस्य

कारागाराईस्यप्रलपनमिति ॥

पूर्वापरविरुद्धमप्यस्ति नृसिंहेन प्रह्लादाय
वरो दत्त एकविंशतिपित्राद्यास्तवमोक्षं ग
च्छंतु पुनरुक्तम्प्रमत्तेन तावेव रावणकुंभ
कर्णौ विभूवतुः पुनस्तावेव शिशुपालदन्तव
क्त्रौ विभूवतुरिति च विरुद्धमेव ॥ ॥ ॥

अप्रश्नेन नृसिंह मे पिता न वेत्ति जोऽविद्वान् भ्रातृहेतिमत्याहृष्टिः
सन्त्वाऽप्रनिंदत् तस्मात्सः पूयेत इमं वरं वरोऽ इति प्रह्लादे
नोक्ते भगवतानुहे वत्स ते पिता एकविंशतिपितृभिः सह
पूतः यतो यस्य कुले त्वं साधुर्जातः किंच हे प्रह्लाद यत्र य
त्र मद्भक्ता बसंति ते कीकटा अपि देशाः शुद्धा भवंतीत्यु
क्तम् हिरण्यकशिपोर्मुक्तिस्तु भागवतेनोक्ता श्रीविष्णु
पुराणे च हिरण्यकशिपुत्वे च रावणत्वे च विष्णुना हत्वा
प निहतो भोगान प्राप्यानमरैरपि नालभत्तत्र चैवेह सा
युज्यं स कथं पुनः संप्राप्तः शिशुपालत्वे सायुज्यं शाश्व
ते हराविष्णवेवोक्तम् इत्थं च पूर्वापरविरुद्धमप्यस्तीति क
स्यचिद्देवानांप्रियस्य कथनमेवेति

भवान्कस्य विकल्पेषु न विमुह्यति कर्हिचिदिति
ब्रह्मणो वरो दत्तो नारायणेन पुनरुक्तं ब्रह्मा मो
हितो भूत्वा वत्सहरणं कृतवानिति विरुद्ध
मेव कथनम् ॥

ब्रह्मणः स्वकन्याभिगमनरूपो मोहः पूर्वकल्पे तत्रैवाऽभू
न्न तु चतुःश्लोकीभागवतोपदेशानंतरमपि यत्तु कृष्णा
ऽवतारे ब्रह्मसंमोहनं तत्तु भगवत्कृपाविलसितमेवे

तिन विरुद्धं कथनम्

कृष्णो नग्नो बाणासुरमातरं न दृष्टवान् पुनरुक्तं प्र
मत्तेन चीरलीलां कृतवानिति विरुद्धमेव ॥ ॥

श्रीरामचंद्रस्ताडकां स्त्रीं अघान शूर्पणखां रावणभगि
नीं राक्षसीं स्त्रीं न जघानेति तत्रापि प्रमत्तकथनमेवं
श्रम् किंच हरिवंशपुराणे कृष्णस्यैकस्य तद्रूपं दर्श
नार्थमागता ऽन्तर्धानमुपागम्य त्यक्तवासा वासमीपु
नः प्रभुर्वेवासुदेवस्य दिग्वासा कोटवी स्थितेति विष्णुपु
राणे नग्ना दैतेय विद्याभृत्कोटवी पुरतो हरेरिति श्रीमद्भा
गवतोक्तकोटरा एव कोटवीति तत्र प्रसिद्धा एवं च नत्वा
पीयं कथा वर्तते अथवा तुष्यतु दुर्जन इति न्यायेन उप
नीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् वेदमध्यापये
देनं शौचाचारांश्च शिक्षयेदिति उपनीय शौचाचारांश्च
शिक्षयेदित्यनेन प्रागुपनयनात्कामचारो दर्शित इति
मिताक्षरायामुक्तम् एवं चात्र न कश्चिद्विरोध इति ॥

भस्मासुरकथायां शिवस्य निंदां कृत्वा पु
नर्विषपानकथायां भवानेव विष्ण्वादीना
मीश्वर इति विरुद्धमेव

भस्मासुरकथायांशिवस्यनिदानकृतेतिपूर्वमेवोक्तम् विद
पानकथायांतुशिवस्यतुनिषेधकृतेतिनविरोधः महाभार
तटीकायामुक्तम् नत्वत्रानर्थकोयुक्तादिप्रलापोभयात् हृ
ष्पतेकशिकनीत्यादिश्चाधर्मप्रवर्तकोपिग्रंथोस्तिनत
स्यकश्चिद्धर्मादिकथनेसत्यपिविषसंपृक्तान्नवत्त्याज्य
मप्येतद्धेयमेव एवंधर्मब्रह्मप्रतिपादनपरवतात्पर्ये अर्थ
वादज्ञानमपियुधिष्ठिरादिवद्वर्तितव्यंनदुर्योधनादिवदि
तितत्रहीनंपक्षमुपाददानःस्वार्थाद्भ्रश्यतितेनाधीतम
पिभारतंपापायैवभवति तथाचसर्वस्मादपिग्रंथात्सा
रमेवादेयमितिरत्नाज्यमितिश्रूयतेग्रंथमभ्यस्यमेधावी
ज्ञानविज्ञानतत्परः पलालमिवधान्यार्थीत्यजेद्ग्रंथमशेषतः
इति एवमत्रापिश्रीमद्भागवतेसारंसारमेवादेयमिति ॥

ऋतेज्ञानान्नमुक्तिरितिश्रुतेः नहिज्ञानेनसदृ
शंपवित्रमिहविद्यतइतिस्मृतेश्च एवंसतिभ
क्तिरेवमोक्षकर्त्रीतिवेदादिभ्योविरुद्धमेव ॥

अत्रयावैसाधनसंपत्तिःपुरुषार्थचतुष्टये तयाविनातदा
प्नोतिनरोनारायणाश्रयइतिमहाभारते अनेनचतुर्वर्गफ
लंनारायणाश्रयणमात्रेणभवतीतिसिद्धम् वाल्मीकि
चितरामचरित्रेमयात्वंसमनुज्ञातोगच्छलोकाननुत्तमान्
गृध्रराजमहासत्वसंस्कृतश्चमयाव्रजेति पाद्मेसंस्कार
मकरोत्तस्यरामोब्रह्मविधानतःस्वपदंचददौतस्मैसोपि

रामप्रसादतः हरेःसमाराधनरूपेणप्राप्यते परमं पदमिति अ
नेनसाधनहीनस्यापितिरश्चः मुक्तिरुक्ता सहस्रनाम
भाष्येसंसारसर्पसंदष्टनष्टचेष्टैकभेषजम् कृष्णेति
वैष्णवंमंत्रं श्रुत्वामुक्तोभवेन्नरइतिभारतविभागे कृ
ष्णःकृष्णःकृष्णइत्यंतकालेजल्पन्जंतुर्जीवितंयोज
हाति ऽप्याद्यः शूद्रः कल्पनेनास्य मुक्त्यै व्रीडानमो निष्ठ
नोऽन्याहृतास्याविति गीतायांदेवान्देवयजोयांतिम
द्भक्तायांतिमामपि अनन्येनाभवमद्भक्तोमद्याजीमांनमस्कु
रु मामेवैष्यसियुक्त्वैवमात्मानंमत्परायणाम् मांहिपा
र्थव्यपाश्रित्ययेपिस्युःपापयोनयः स्त्रियोवैश्यास्तथा
शूद्रास्तेपियांतिपरांगतिमित्यादि ऽअन्यसाधनानपेक्षत्वं
भक्तियोगस्यज्ञानयोगादेश्चहरिपदसेवनसापेक्षत्वंज्ञा
नयोगस्यभगवदाराधनंतत्प्रसादंचविनैवसिद्धिरितिन
क्वापिकेनाप्युक्तम् किंचभक्तियोगेदुराचारिणोपिदृढ
वैराग्यरहितस्याप्यधिकारो गम्यते ऽअपिचेत्सुदुराचा
रोभजतेमामनन्यभाक् साधुरेवसमंतव्यःसम्यग्व्यवसि
तोहिसः क्षिप्रंभवतिधर्मात्माशश्वच्छांतिंनिगच्छति
कौंतेयप्रतिजानीहिनमेभक्तःप्रणश्यति ननिर्विण्णो
नातिसक्तोभक्तियोगोस्यसिद्धिदइत्यादिवचनेभ्यः
नैवंदुराचारिणोपिदृढवैराग्यादिसाधनचतुष्टयसंप
त्त्यभावेपिवेदांतश्रवणाद्यनुष्ठितोज्ञानोत्पत्तिर्भवती

तिक्काप्युपलभ्यतेनचयथोक्ताधिकारसंपत्तिं विनानुष्ठि
तंसाधनंकिमपिफलायकल्पतेतस्मात्सर्वेषांसर्वैःक
लौहरिपादसेवनादिभक्तियोगाश्रयणमेवकर्तव्यमि
तिसिद्धम् इतिधर्मशास्त्रनिबन्धेषुगोविंदाष्टकेशंकरा
चार्यैरुक्तम् गोविंदाष्टकमेतदधीतेगोविंदार्पितचेता
योगोविंदाच्युतमाधवविष्णोगोकुलनायककृष्णेति
गोविंदांघ्रिसरोजध्यानसुधाजलधौतसमस्ताघोगोविं
दाम्रतमंतस्थंससमभ्येतिगोविंदंपरमानंदमितितट्टी
कायांचोक्तमानंदगिरिणायस्तुनिरंतरंगोविंदार्प्पित
चेताःसन्नेतद्गोविंदाष्टकमधीतेगोविंदाच्युतमाधवि
ष्णोगोकुलनायककृष्णेतिएतानिनामानिकीर्तयति
गोविंदांघ्रिसरोजध्यानसुधाजलधौतसमस्ताघःप्रक्षा
लिताऽशेषपापोभूत्वागोविंदंपरमानन्दात्मनंमरणा
दिरहितमंतस्थंससमभ्येतिसम्यक्निरुपद्रवस्थान
माप्नोतिमद्भक्तायांतिमामितिभगवद्वचनादितिकिंचपु
रुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्ययाभक्त्यात्वनन्य
याशक्यअहमेवंविधोऽर्जुनेत्यादौभगवद्भक्तेर्मोक्षंप्र
तिसाधकतमत्वश्रवणात्तदेकांतभक्तिरेवतत्प्रसाद
द्वात्मज्ञानावांतरव्यापारमात्रयुक्तामोक्षहेतुरितिस्फु
टंप्रतीयते ज्ञानस्यचभक्त्यावांतरव्यापारत्वमेवयुक्तंते
षांसततयुक्तानांभजतांप्रीतिपूर्वकम् ददामिबुद्धियोगं

तयेनमामुपयान्तितेमद्भक्तएतद्विज्ञायमद्भावायोपपद्यते
इत्यादिवचनात्तच्चज्ञानमेवभक्तिरित्युक्तं समःसर्वेषु
भूतेषुमद्भक्तिंलभतेपराम्भक्त्यामामभिजानाति यावा
न्यश्चास्मि तत्वतइत्यादौभेदेननिर्देशान्नचैवंसतितमेववि
दित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायऋतेज्ञाना
न्नमुक्तिरित्यादिश्रुतिविरोधःशंकनीयःभक्त्यावांतर
व्यापारत्वात्ज्ञानस्यनहिकाष्ठैःपचतीत्युक्तेज्वालानाम
साधनत्वमुक्तंभवतिश्रुतिस्मृतिपुराणवचनान्येवंसति
समंजसानिभवंतितस्माद्भक्तिरेवमोक्षहेतुरितिसिद्धम्
श्रीमद्भगवद्भक्तिरसायनेमधुसूदनसरस्वतीविरचितेनव
रसमिलितंवाकेवलंवापुमर्थंपरममिहमुकुंदेभक्तियो
गंवदंतिभक्तिःपरमपुरुषार्थइतिसर्वशास्त्रसिद्धांतःस
र्वसुकृतसाध्यत्वेनसर्ववेदतात्पर्यविषयत्वेनचात्यन्ति
श्रेयसनिर्वृत्तिशब्दाभ्यांसाक्षादेवपुरुषार्थत्वंदर्शितमि
त्युक्तम् वस्तुतःनारदपंचरात्रेहरिभक्तिमहादेव्याःसर्व
मुक्त्यादिसिद्धयःभुक्तयश्चाद्भुतास्तस्याश्चेटिकावदनु
व्रताइतिज्ञानतःसुलभामुक्तिर्भुक्तिर्यज्ञादिपुण्यतः
सेयंसाधनसाहस्रैर्हरिभक्तिःसुदुर्लभेतिभुक्तिमुक्ति
स्पृहायावत्पिशाचीहृदिवर्तते तावद्भक्तिसुखस्यात्र
कथमभ्युदयोभवेदिति पाद्मेवरंदेवमोक्षंनमोक्षावधि
[illegible]चानंदगोदं [illegible] पादपीतइदंतेवपुर्नाथगोपाल

त्वंसदामेमनस्याविरास्तां किमन्यैः कुबेरात्मजौवद्धमू
र्खैवयदत्वयामोचितौभक्तिभाजौकृतौचनथाप्रेमभक्तिं
स्वकांमेप्रयच्छनमोक्षंप्रहोमेस्तिदामोदरेहेतिहयशी
र्षीयनारायणव्यूहस्तवेचनधर्मकामसमर्थंवामोक्षंवा
वरदेश्वरप्रार्थयेनवपादाब्जदास्यमेवाभिकामयेपुनःपु
नर्वरान्दित्सुर्विष्णुर्मुक्तिंनयाचितःभक्तिरेववृतायेन
प्रह्लादंतंनमाम्यहम् यदृच्छयालब्धमपिविष्णोर्दाशर
थेस्तुयः नैच्छन्मोक्षंविनादास्यंतस्मैहनुमतेनमः इति ।
ऽप्रतएवप्रसिद्धंश्रीहनुमद्वचनम् भववंधच्छिदेतस्मै
स्पृहयामिनमुक्तयेभवान्प्रभुरहंदास इतियत्रविलुप्य
तेश्रीनारदपंचरात्रेऽजितस्तोत्रेधर्मार्थकाममोक्षेषुने
च्छाममकदाचनत्वत्पादपंकजस्याधोजीवितंदीयतांम
ममोक्षसालोक्यसारूप्यान्प्रार्थयेनधराधरइच्छामि
हिमहाभागकारुण्यंतवसुव्रतइत्यादिवचनैर्मोक्षादपि
भगवद्भक्तिरतिश्रेष्ठादुर्लभाचकलौतुभगवद्भक्त्यैवजीवा
नांश्रेयोनज्ञानादिनाहरेर्नामहरेर्नामहरेर्नामैवकेवलं
कलौनास्त्येवनास्त्येवनास्त्येवगतिरन्यथा सर्वकारणं
त्येतदुर्लभंचाकृतात्मनांकलौयुगेहरेर्नामनेकृतार्थानं
संशयःयदभ्यर्च्यहरिंभक्त्याकृतेक्रतुशतैरपि फलंप्राप्नो
त्यविकलंकलौगोविंदकीर्तनात् ध्यायन्कृतेयजन्य
ज्ञैस्त्रेतायांद्वापरेऽर्चयन्यदाप्नोतितदाप्नोतिकलौसंकी

र्थं केशवम् महाभारतटीकायां नीलकण्ठचतुर्धरकृताया
म् यस्यैकैकनामव्याहारोऽपि सकृदपि येन केन चिद्यादृशेन
तादृशेन यस्यां कस्यांचिदवस्थायाम् यत्र कचिद्यदा कद
चित् यथा कथंचित्कृतेः सुकृष्टं फलं ददाति यथा च पु
राणे सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् बद्धः परिकर
स्तेन मोक्षाय गमनं प्रतिस्याद: पुल्कसको वापि मुच्येरन्य
स्य कीर्तनात् ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रांत्यजा
दयः यत्र तत्रानुकुर्वंतो विष्णोर्नामानुकीर्तनम् सर्वपापवि
निर्मुक्तास्तेपि यांति सनातनम् अथं हि कृतनिर्वेशोऽजन्म
कोटंहसामपि यद्व्याजहार विवशो नाम स्वस्त्ययनं ह
रेः अयं अजामिलस्तेन सुरापो गुरुतल्पगः स्त्रीराजपि
तृगोहंता ये वा पातकिनोऽपरे सर्वेषामप्यघवतामिदमे
व सुनिष्कृतम् नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः
विष्णुधर्मे चक्रायुधस्य नामानि सदा सर्वत्र कीर्तयेत् ना
शौचं कीर्तने तस्य पवित्रं कुरुते यतः स्कांदे न देशकाला
वस्थासु शुद्ध्यादिकमपेक्षते किंतु स्वतंत्रमेवैतन्नाम
कामितकामदम् न देश नियमस्तस्मिन्न काल नियम
स्तथा नोच्छिष्टादौ निषेधश्च श्रीहरेर्नाम्नि लुब्धके वि
ष्णुधर्मोत्तरे नामानि सर्वाणि जनार्दनस्य कालश्च सर्वः
पुरुषप्रवीर तस्मात्सदा सर्वगं तस्य नाम ग्राह्यं यथेष्टं व
रदस्य राजन् ब्रह्मपुराणे अनन्यचित्तः शुद्धो वा यः सदा

कीर्तयेद्धरिम् सोपि दोषक्षयान्मुक्तिं लभेच्चेहिपतिर्यथा प
द्मपुराणे कृष्णेति वैष्णवं मंत्रं श्रुत्वा मुक्तो भवेन्नरः यत्र कु
त्र स्थितो वापि कृष्ण कृष्णेति कीर्तनात् सर्वपापविशुद्धा
त्मा स गच्छेत्परमां गतिं सर्वधर्मोज्झिता विष्णोर्नाममात्रै
कजल्पकाः सुखेन यां गतिं यान्ति न तां सर्वेपि धार्मिकाः
विष्णुपुराणे विष्णुसंस्मरणादेव समस्तक्लेशसंक्षयः भ
ध्यमयानाम पहारिणि स्थिते मनस्यनंते मयि कुत्र तिष्ठति
यस्मिन्न्यस्ते जन्मजरोद्भवानि भयानि सर्वाणि पहंतिता
न्मात्स्ये परदाररतो वापि परापकृतिकारकः सशुद्धो मु
क्तिमाप्नोति कृष्णनामानुकीर्त्तनात् आदिपुराणे ह
रेः संकीर्त्तनं पुण्यं महापातकनाशनम् सर्वकामप्रदं लो
केप्यपवर्गफलप्रदमित्याद्युक्तम् अतः कलौ तपो योग
विद्यायज्ञादिकाः क्रियाः सांगा भवंति न कलौ कुशलैरपि
देहिभिरित्यादीनि वचनान्यनेकानि तत्प्रतिपादकानि सं
त्येव किं बहुलेखनेनेति इत्थं च भक्तिरेव मोक्षकर्त्री निवेदा
दिभ्यो विरक्तस्यैवेति कस्यचिद्व्याख्या अभिज्ञस्यैव कथनमिति

अतः कुत्रेयस्य भागवताख्यस्य कर्णामृतस्या
स्यात्कारणात्सुखेप्सुभिः कदाचिदिदं प्रमत्तगी
तं भागवतं न कथनीयं न श्रोतव्यं चेति सिद्धांतः
येनु लोभाच्छ्रावयंति मूर्खत्वाच्छृण्वंति ते वै
नरके पतिष्यंति येप्रमत्तगीतमिदं भागवतं

श्रावयतिश्रवणंवतिचतेसर्वेपापकारिणःअत
एवमहापातकिनस्तंतियश्चकथितवान्वोपदे
वारवस्तोपिपापकारीमहापातकीचास्तिअत
एवप्रमत्तगीतस्यास्यभागवतस्याध्ययनमध्या
पनंकथनंश्रवणंचनरकगामकमेवकिंबहुना
लेखनेनैतावतैववेदितव्यंयुष्माभिरेवमेवजन्मा
द्यस्ययतोन्वयादितरतश्चेत्यादिश्लोकैर्निर्मि
तमिदंभागवतंसर्वमशुद्धमिति॥ ॥ ॥

योऽनभिज्ञायमुनिभिःकृतंशास्त्रंदूषयतिसब्रह्मघातीतदु
क्तंमहाभारते:प्रवृत्तांश्रुतिंसम्यक्शास्त्रंवामुनिभिःकृतम्
दूषयत्यनभिज्ञायतंविद्याद्ब्रह्मघातिनमिति श्रीमद्भागवतं
महापुराणंसर्ववेदेतिहासानांसारमनादिसिद्धमपिवोप
देवरचितत्वादाधुनिकमितिदुष्टाःप्रमत्तावदंतिकिमत्र
चित्रंनास्तिकाश्चार्वाकादयःपरमेश्वरमपिनोरीकुर्वंति
अनादिसिद्धंवेदमपिव्याघातपुनरुक्तत्वादिदोषग्रस्तंभ
राडधूर्तादिभिर्विरचितमाधुनिकमितिवदंत्येवतदुक्तंना
स्तिकैः:यावज्जीवंसुखंजीवेदृणंकृत्वाघृतंपिवेत्भस्मी।
भूतस्यदेहस्यपुनरागमनंकुतः अग्निहोत्रंत्रयोवेदास्त्रि
दंडंभस्मगुंठनम्बुद्धिपौरुषहीनानांजीविकेतिबृह
स्पतिःयदिगच्छेत्परंलोकंदेहादेवविनिर्गतःकस्माद्भूयो
नचायातिबंधुस्नेहसमाकुलःततश्चजीवनोपायोब्राह्म

रोर्दहितस्त्विह मत्तानोप्रेतवार्य्यो रिपुत्वम्पद्दिघ्नेतकश्चित् त्र
येवदस्यकर्त्तारो भंडधूर्त्तनिशाचराः तर्फरीतुर्फरीत्यादिपण्डिता
नांवचः स्मरतमिति इत्थंच अतः कुग्रंथस्यैत्यादिकस्यचिन्नास्ति
कस्याः संभावनानर्हस्य जन्मांधस्य पतितस्य संन्यासाभासस्य
कथनमेव झेयन् ताअंडान्यवलंब्य भराड मतयः प्रौढाभिमान
ध्वयः स्वल्पज्ञावहुदुखिनः स्फुरतरं कालस्य भस्याश्रयेदेवं
नेदधनेसुखात्म निर्हरौनान्नाभवाच्छेत्तरौकांक्षाकल्पतरोज
गत्त्रयगुरोविम्बं भंगोऽस्यपि ॥१॥ गोविंदसेवनमिदं यदिनाद्वि
यंनेदुष्टानिरूपमनयोः विषयैकनिष्ठाः किं तावता ज्वरवता
मरुचेर्नजातु दुग्धस्य मुख्यमधुरस्य विदूषणास्यात् ॥२॥

कथंतर्हि श्रीधरादिभिरमुष्यस्यापरिटीकाकृता
अज्ञानत्वात् कृत एतद्ज्ञानत्वं तेषु श्रीधरादिषु
न ज्ञानमस्मुद्दैतेरतोऽज्ञानत्वमेव ॥ ॥ ॥

श्रीमद्भागवतस्य हनुमद्भाष्यसंबंधोक्ति विद्वत्कामधेनुत
त्वदीपिका विवरणपरमहंसप्रियाशुकहृदयादयस्तथाशं
कराचार्य्यनीलकण्ठसदानंदनिधुपण्डितगोविंदादिभि
श्वकृता व्याख्याग्रंथाः संति तथा भगवद्भक्तिरसायनमुक्ता
फलहरिलीलाभक्तिरत्नावल्यादयो निबंधाश्चविविधाविद्यं
ते किंचवैष्णवव्यतिरिक्ताः प्रामाणिका अपिस्वस्वग्रंथेषु
श्रीमद्भागवतस्यसंमतिंददुः क्वास्तिसंमतिरिति चेदवधे
हि संवत्सरप्रदीपे हेमाद्रौ सच्चरितमीमांसाख्ये विवारो
त्तंजनेश्वनराजे जयसिंहकल्पद्रुमे वनार्के देवेः प्रका

शेनिर्णयसिंधौश्राद्धमयूखेव्यवहारमयूखेधर्मसिंधौदिन करोद्योतादौच एवंमहाभारतटीकायांनीलकंठचतुर्धरकृ तायांनागोजिभट्टविरचितायांसप्तशतीव्याख्यायांशिव तत्वविवेकेकालनिर्णयदीपिकाविवरणेवीरमित्रोदयेग रुडपुराणटीकायांवाल्मीकिरामायणटीकायांमहिम्नः स्तवराजस्यटीकायांभट्टोजिदीक्षितकृतायांचतुर्विंशति मतव्याख्यायांकाशीखण्डटीकायांयोगवासिष्ठटीकायां तथान्यास्वपिटीकासु तथाविद्वद्भक्तानांसर्वेष्वपिग्रंथे ष्विति इत्थंचैतेविद्वत्तमाः सर्वेऽपितवप्रमत्तस्यमतेमूर्खा एवेति ॥

सत्यंपरंधीमहीत्यत्रशिष्याभिप्रायंबहुवचनमि त्युक्तवान् प्रमत्तःश्रीधरइतिशिष्यास्तुउष्मदि वर्त्तन्तेकुतोऽभिप्रायस्तत्रायातःएकोपिब्रूयादेव मह्यंब्रवीमिवयंब्रूमोवाऽस्मदोद्वयोश्चेतिव्याकर णासत्रादतोऽस्मदमेतच्छिष्याभिप्रायंबहुवचन मिति ॥

ऽप्रत्रश्रस्मदोद्वयोश्चेत्यनुशासनाद्यद्यपिएकत्वेद्वित्वेचवि वक्षितेऽस्मदोबहुवचनंविकल्पेनभवतितथापिप्रथमोप स्थितत्वादेकवचनंपरित्यज्यबहुवचनपर्यन्तानुधावनंकि मितिविधेयकृतामित्याशंक्यशिष्याभिप्रायंबहुवचनमिति स्वामिपादैस्समभ्यगेवोक्तम् एवंध्यायंध्यायंपरंब्रह्मस्मारं स्मारंगुरोर्गिरःसिद्धान्तकौमुदीव्याख्यांकुर्मःप्रौढमनोर मामित्यादावपिज्ञेयम् इत्थंचप्रमत्तःश्रीधरइत्यादिकथनं तुकस्यचिज्जल्मोधस्यवाचाटस्यैवेति॥

अन्यकृतमितिनशंकनीयमित्युक्तं च श्रीधरेण
प्राप्तौसत्यांनिषेधः अतोऽन्यकृतमेव ॥ ० ॥

अथैतन्निश्चयबाधकप्रमाणस्याभावेऽप्यस्यादर्शितस्य जागरू
कत्वेनैतन्निश्चयानुत्पत्तेरिति अथवा मीमांसकवैशेषिकमो
त्तमादिभिर्वेदस्य प्रामाण्यं साधितमिति प्राग्वेदप्रामाण्य
शंकास्थितेति नस्वीक्रियते अथापि स्वीकार्य्यं अथास्ति
कादीनां वेदप्रामाण्यशंकाभावेऽपि नास्तिकानां सास्थितेति
स्म: समाधिः यथा मन्वादिधर्मशास्त्रेऽपि चौर्य्यहिंसादिनि
षेधात्प्राक्तदनुष्ठानं स्थितमिति नस्वीक्रियते तेन तथा प्रकृते
अथवा विधिना चौर्य्याद्यनुष्ठानाऽभावेपि रागप्राप्तं तदासी
दिति तर्ह्यत्रापि द्वेषतस्तदाशंकनं स्थितमिति समाधानम्
इत्थं च अन्यकृतमित्यादिकं कस्यचिद्बालस्यैव कथनमि
ति ज्ञेयम् ॥

नायं श्रीधरनामाकस्तर्हि दरिद्राधरनामैवास्ति कु
तो मूर्खत्वात् किं बहुनालेखनेन श्रीधरादीनां
ज्ञानमेव नास्ति वेदादिषु इति स्थालीपुलाकन्या
यवल्लेखनं कृतमस्माभिस्तद्बुधाभिर्वेदितव्यं
सर्वभागवतमध्युदमिति

माधवसरस्वतीसमयेकेन चित्सरिडनेन भागवतमप्रमाण
मित्युक्तम् तदा स्वामिभिरुक्तमयं जारजो भविष्यतीति विचार
णीयम् तदा परिडतैर्विचारितः स गोलक इति निश्चितमिति
रामाश्रमाचार्य्येण दुर्जनमुखचपेटिकायामुक्तमिति इत्थं
चनायमित्यादिकं कस्यचिज्जारजातस्याश्रस्य धार्त्तराष्ट्र

कृतः क्लेशपरिक्षयः स्यात् कृतश्च सुखं न कृमाश्रितानां विहंगमानामिह सौख्यलाभः ॥१॥ गोविंद एव सुखसिंधुरिति श्रुतीनां संशीलनादवगतं शतसोमहद्भिः किं चास्य चिंतनकृतां तनुरं चितैव रोमांचितैर्भवति हर्षजलं च नेत्रे ॥२॥ दुर्जनो दूषयत्येव सतां गुणगणं क्षणात् मलिनीकुरुते धूम. सर्वथा निर्मलां वरम् ॥३॥ गुणी गुणं वेत्ति न वेत्ति निर्गुणो बली बलं वेत्ति न वेत्ति निर्बलः पिको वसन्तस्य गुणं न वायसः करी च सिंहस्य बलं न मूषिकः ॥४॥ गुणा गुणज्ञेषु गुणा भवंति ते निर्गुणं प्राप्य भवंति दोषाः सुस्वादुतोयाः प्रभवंति नद्यः समुद्रमासाद्य भवंत्यपेयाः ॥५॥ गुणायंते दोषाः सुजनवदने दुर्जनमुखे गुणा दोषायंते किमिति जगतां विस्मयपदम् यथा जीमूतो यं लवणजलधेर्वारि मधुरं फणी पीत्वा क्षीरं वमति गरलं दुःसहतरम् ॥६॥ प्रतिरमणीयेऽग्रन्थेऽपि पिशुनो दूषणमन्वेषयति अतिरमणीये वपुषि व्रणमिव मक्षिकानिकरः ॥७॥ ० ॥ ० ॥ ० ॥

ब्राह्मणक्षत्रियविट्शूद्रा वर्णाः ब्रह्मचारिगृहिवनिसंन्यासिनश्चाश्रमाश्चत्वारः एषां वेदेषु मनुस्मृतौ च धर्मा उक्ताः एभ्यो ये विरोधिनस्ते पाषण्डिन एव किं लक्षणास्ते चक्राद्यंकनकेवलोर्ध्वपुण्ड्रकाष्ठमालाधारिणः न प्रमुद्रोर्ध्वपुण्ड्रदेहनरकावाससाधनेन तस्मात् त्याज्यमनघैर्द्विजैर्नरकभीरुभिरिति जाबालिः १ विभूतिधारणं त्यक्त्वा तत्कारुद्राक्षधारणम् साम्बपूजयविश्वेशं शिवलिंगस्वरूपिणमित्याद विष्णुपुराणे यज्ञो वै विष्णुरिति श्रुतेर्यज्ञकर्त्ता वैष्णवो नान्यः बृहन्नारदीयपुराणे धर्म्मभगीरथसंवादे भगीरथं प्रति धर्म्मराजवाक्यम् यस्य संनयः संज्ञा...

लिंगांकितः तनुर्नरः सर्वयातनाभागी चाण्डालकोटिजन्मसु एतल्लक्षणाः पाषण्डिनः येतु पाषण्डिमतविश्वासिनस्तेपि पाषण्डिनः पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान् हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेदित्यादिमनः अत एव वाङ्मात्रेणापि पाषण्डिभिस्सह व्यवहारो न कर्त्तव्यः॥ ॥

वर्णाश्रमधर्मा वेदेषु मनुस्मृतौ चोक्ताः एभ्यो विरोधिनस्ते पाषण्डिन एव वने च अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत् उपेक्षकोऽसंकुसुको मुनिर्भावसमाहित इत्यादि मनुस्मृत्युक्तसंन्यासिधर्म्मविरुद्धाचारिणो दण्डादिलिंगमात्रधारिणः संन्यासिन एव ननु चक्राद्यंकनोर्द्ध्वपुण्ड्रादिधारिणो वैष्णवाः न च मनुस्मृतौ चक्राद्यंकनादेर्निषेधो दृश्यते चरः शास्त्रेषु च बहुधा चक्राद्यंकनादेर्माहात्म्यप्रतिपादनात् तदुक्तं वाराहे अंकयेत्तप्तचक्राद्यैरात्मनो बाहुमूलयोः कलत्रापत्यभृत्येषु यदीच्छेत्सर्वसंपदमिति सोपि रौऽस्यश्चिर्वाप्यनाचारः सर्वधर्म्मबहिष्कृतः अतप्तशंखचक्राभ्यामंकितः पंक्तिपावन इति पाद्मे शंखचक्रोर्द्ध्वपुण्ड्रादिरहितं पुरुषाधमं गर्दभं तु समारुह्य राजा राष्ट्रात्प्रवासयेदिति स्कान्दे नारायणायुधैर्नित्यं चिह्नितो यस्य विग्रहः पापकोटियुतस्यापि तस्य किं कुरुते यमः अंकितैः शंखचक्राभ्यामुभयोर्बाहुमूलयोः समर्चयेद्धरिं नित्यं नान्यथा पूजनं भवेदिति सनत्कुमारसंहितायां चक्रं च दक्षिणे बाहावित्यादि काशीखण्डे उपवीतादिवद्धार्य्याः शंखचक्रादयः सदा ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषत इति वाराहे चक्रादिधारणं पुंसां परसंबंधवेदनम् पातिव्रत्यनिमित्तं हि वल

[illegible]

मादायवैष्णवः धारयेत्सर्ववर्णानां हरिसालोक्यसिद्धय इति
ब्रह्मांडे कृत्वाधातुमयीं मुद्रां तापयित्वा स्वकां तनुं चक्रादि चि
ह्नितां भूप धारयेद्वैष्णवो नर इति श्रुतश्च यो ह वै सुप्तलोकमौ
लेर्धीमाननुतिष्ठमानोऽग्निना चक्रं धत्ते ऽग्निर्वै सहस्रारः
सहस्रारि नेमिना तप्ततनुः सायुज्यं सलोकतामाप्नोति चक्रं
बिभर्ति वपुषाभितप्तं बलं देवानाममृतस्य विष्णोः स एति ना
कं दुरितं विधूय विशंति यद्यतयो वीतरागा इत्याद्या बहवः पाद्मे
नरखंडे शंखचक्रादिभिश्चिह्नैर्विप्रः प्रियतमो हरेः रहितस्सर्व
धर्मेभ्यः प्रच्युतो नरकं व्रजेदित्याद्यनेकवचनानि हरिभक्ति
विलाससदाचारचंद्रिकारामार्चनचंद्रिकामथुरासेतुजय
सिंहकल्पद्रुमादिग्रंथेषु संत्येव किं बहुलेखनेनेति १७प्र(
योर्ध्वपुंड्रमाहात्म्यम् पराशरमाधवीये सत्यव्रतः ऊर्ध्वपुंड्रोम्र(
दास्युभ्यो ललाटे यस्य दृश्यते स चांडालोऽपि शुद्धात्मा पूज्य एव
न संशय इति मदनरत्ने मदनपारिजात प्रयोगपारिजातेषु
ब्राह्मे योगो दानं जपो होमः स्वाध्यायः पितृतर्पणम् भस्मीभ
वति तत्सर्वमूर्ध्वपुंड्रं विना कृतमिति कृष्णभट्टीयाह्निके तु
जपो होमस्तपो दानं स्वाध्याय इति पूर्ववत् निर्णयसिंधौ हेमा
द्रौ देवल: ललाटे पुंड्रकं दृष्ट्वा स्कांधे मालां तथैव च निराशाः पि
तरो यांति दृष्ट्वा च वृषलीपतिम् पुंड्रं वर्तुलमित्यपरार्के मदनरत्ने
च पुंड्रं त्रिपुंड्रं वर्तुलमर्धचंद्रं च ऊर्ध्वं च तिलकं कुर्यान्न कुर्याद्दै
त्रिपुंड्रकम् ऊर्ध्वं च तिलकं कुर्याद्दैवे पित्र्ये च कर्मणि निरा
शाः पितरो यांति दृष्ट्वा चैव त्रिपुंड्रकमिति वृद्धपराशरोक्तेः ति
र्यग्लेपो भवस्यैव वर्जयेत्तिलकं भाले श्राद्धकाले च सर्वदा (

चंद्र इति पाद्मोत्तरखंडे श्रीशिवपार्वतीसंवादे ऊर्ध्वपुंड्रधरो
विप्रः सर्वलोकेषु पूजितः विमानवरमारुह्य याति विष्णोः परं
पदं ऊर्द्धपुंड्रधरं विप्रं दृष्ट्वा पापैः प्रमुच्यते नामस्मृत्वा तथाभ
क्त्या सर्वदानफलं लभेदित्यादि ब्रह्मांडपुराणे ऽप्यशुचिर्वा
प्यनाचारो मनसा पापमाचरन् शुचिरेव भवेन्नित्यमूर्द्धपुं
ड्रांकितो नर इत्याद्यनेकवचनान्यूर्द्धपुंड्रमाहात्म्यप्रतिपाद
कानि संत्येव किंच महाभारतटीकायामुक्तं न वासुदेवोपनि
षद्व्याख्याने तत्र पुराणोपबृंहणानुसारात् श्रीणामेक उदकं
गामवाजतीति ऋक्च भवतां मध्ये एकः श्रीणां श्लक्ष्णांगा
मदं गोपीचंदनादिरूपां मुख्यकर्मभूतां प्रति उदकं जलं गौणे
न कर्मणा ऽवाजति ऽवगमयति अंतर्भावितणार्थोयम् श्री
णां गां उदकेन मिश्रयतीत्यर्थः ऊर्द्धपुंड्रार्थं श्लक्ष्णां मदं जले
न मिश्रयेत् विष्णुभजनांगमूर्द्धपुंड्रमित्यादि विस्तरेणोक्त
म् तत्रैवावलोकनीयमिति किं बहुना ऽथ तुलसीकाष्ट
मालाधारणमाहात्म्यम् ऽगस्त्यसंहितायां रामार्चनचंद्रिका
यां च तुलसीकाष्ठघटितैरुद्राक्षाकारकारितैः शंखचक्रगदा
पद्मपादुकाकारकारितैः निर्मितां मालिकां कंठे निधायार्च
नमारभेदिति नृसिंहाराधनरत्नमालायाम् तुलसीकाष्ठघटितै
र्मणिभिर्जपमालिका सर्वकर्माणि सर्वेषामीप्सितार्थफल
प्रदेति नृसिंहपरिचर्यायां ऽथ विष्णुसमर्पितां तुलसी
काष्ठमालां धात्रीफलमालां पद्माक्षमालां वा कंठे बिभृ
यादिति गौतमीयतंत्रे च द्वादश्यां सदा प्रीतमनास्तस्य कृष्णो दे
वकीनंदनः तुलसीकाष्ठसंभूतां यो मालां वहते नरः प्राय
श्चित्तं न तस्यास्ति नाशौचं तस्य विद्यत इति मथुरासेतौ पुरा

शासमुच्चयेयः कुर्य्यात्तुलसीकाष्ठैरक्षमालां सुरूपिणीम्
कंठमालां प्रयत्नेन कृतं तस्याक्षयं भवेदिति निर्णयसिंधौ
स्कांदे द्वारकामाहात्म्ये निवेद्य केशवे मालां तुलसीकाष्ठसं
भवाम् वहते यो नरो भक्त्या तस्य वै नास्ति पातकम् नजह्यात्तुल
सीमालां धात्रीमालां विशेषतः महापातकसंहर्त्रीं धर्मकामा
र्थदायिनीम् विष्णुधर्मस्कन्धे तु यानि लोमानि धात्रीमालाक
लेवरगाम् तावद्वर्षसहस्राणि वैकुंठे वसतिर्भवेत् माला
युग्मं तु यो नित्यं धात्रीतुलसिसंभवम् वहते कण्ठदेशे तु क
ल्पकोटि दिवं वसेत् तुलसीकाष्ठसंभूते माले कृष्णजनप्रिये
बिभर्मि त्वामहं कण्ठे कुरु मां कृष्णवल्लभम् एवं संप्रार्थ्य
विधिवन्मालां कृष्णगलेऽर्पिताम् धारयेत्कार्तिके यो वै स ग
च्छेद्वैष्णवं पदमिति यत्तु तत्रैव मालाधारणप्रकरणे सर्वपु
स्तकेष्वदृश्यमानमप्यत्र मूले लिखितमिति कश्चिन्निर्णयसिंधु
पुस्तके दृश्यते तस्य मालाधारणविधिवाक्यानां नाप्रामाणि
कत्वेनासर्व्यस्य मेव स्कंदपुराणस्यत्वेन विष्णुधर्मस्यत्वेनो
क्तानां स्वयमेवाप्रामाणिकत्वोक्तौ व्याघातप्रसंगात् तुलसी
काष्ठघटितैरुद्राक्षाकारकारितैः निर्मितां मालिकां कंठे निधा
यार्चनमारभेत् तुलसीकाष्ठमालया भूषितः कर्म आचरन् पि
तृणां देवतानां च कृतं कोटिगुणं भवेदिति पद्मपुराणे पाता
लखंडे नदसप्ततितमाध्याये प्रत्यक्षोपलभ्यमानविरोधाच्चैत
स्यैव माधवादिमूलग्रन्थेष्वनुपलभ्यत इत्येव तत्परिभाषाना
सर्व्यनत्व प्रामाणिकत्वे एतदनुपन्यासेपि माधवादीनां न
: न्यूनतेति रामार्चनचंद्रिकादौ तुलसीकाष्ठमालया जपविधि
... तुलसीकाष्ठघटितैर्मणिभिर्जपमालिके सादी

डालव्रतिकस्य वकव्रतचरस्य महानिंदकस्य निरयगामिनो
दर्शनभाषणाद्यनर्हस्य वान्ताशिनः पतितस्य कथनम् पति
तसंसर्गेणापि पतति अतस्तेन सर्वथा संभाषणादि संस
र्गः कदापि न विधेयः एवं त्रिदण्डधारणमपि मनुस्मृतौ तट्टी
कायां च कुल्लूकभट्टेन कथितमेव किं बहुलेखनेन तत्रै
वाऽवलोकनीयमिति ॥

पाषाणादिमूर्त्तिपूजनं पाषण्डमतमेव कुतः ए
तन्नवेदादिभ्यो विरोधात् यद्वाचानभ्युदितं येन वाग
भ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते यन्म
नसा न मनुते येनाहुर्मनो मतम् तदेव० २ यत्प्राणे
न न प्राणिति येन प्राणः प्रणीयते तदेव० ३ इत्यादि
श्रुतिभ्यः अत एव पाषाणादिकृत्रिममूर्त्तिपूज
नं दूषितं अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः
इति भगवद्गीतावचनात् किं बहुना लेखनेनैवं तै
र्वसज्जनैर्वेदितव्यम् विदित्वाचरणीयमेव दयान
न्दसरस्वत्याख्येन स्वामिना निर्मितमिदं पत्रं वेदि
तव्यं विद्वद्भिरिति शुभं भवतु वक्तृभ्यः श्रोतृभ्यश्च
वेदोपवेदवेदाङ्गमनुस्मृतिमहाभारतहरिवंशपु
राणानां वाल्मीकिनिर्मितस्य रामायणस्य चा
ध्यापनमध्ययनं कर्त्तव्यं कारयितव्यं च एतेषा
मेव श्रवणं कर्त्तव्यमिति

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वे
न प्रवेष्टुं च परंतप मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जि
तः निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव क्लेशोऽधिकत
रस्तेषामव्यक्तासक्तचेतसां अव्यक्ता हि गतिर्दुःखं देहव

।स्पष्ट... [illegible] ...नपाषपाम्पुपलभ्यते।
शीयवैष्णवेषुतुलसीकाष्ठमालाधारणजपाचारश्चे
ष्यनइतिधर्मसिंधावुक्तम् काशीखंडब्राह्मणाःक्ष
वैश्यःशूद्रोवायदिवेतरःशंखचक्रांकिततनुस्तुलसी
रीधरःगोपीचंदनलिप्तांगोदृष्टश्चेनदघंकुतइतिकिंवहु
खनेनेतिपद्मपुराणेकपालभस्मास्थिधरायेह्यवैदिका
गिनःअवैदिकक्रियोपेतास्तेवैपाषंडिनःस्मृताःशं
चक्रोर्ध्वपुंड्रादिचिह्नैःप्रियतमैर्हरेःरहितायेद्विजादेवि
पाषंडिनःस्मृताःसमस्तयज्ञभोक्तारंविष्णुंब्रह्मणपदे
मुद्दिश्यदेवताएवजुहोतिचददातियःसपाषंडीतिविः
स्वतंत्रोवापिकर्मसुस्वानंयान्क्रियतेयेस्तुकर्मवेदोदिं
णारायणंदेवंब्रह्मरुद्रादिदैवतैःसमत्वेनैववीक्ष
डीभवेत्सदाअवस्थात्रितयेयस्तुमनोवाक्काय
मुदेवंनजानातिसपाषंडीभवेद्द्विजःकिम
हुनोक्तेनब्राह्मणायेह्यवैष्णवाइतिजीविकार्थंदंडधा
पदार्थखंडनादिनानरकगामित्वमतदुक्तंमनुस्मृतौधर्म
जीसदालुब्धश्छाद्मिकोलोकदंभकःवैडालव्रतिकोज्ञे
हिंस्रःसर्वाभिसंधकःअधोदृष्टिर्नैष्कृतिकःस्वार्थसा
ननत्परःशठोमिथ्याविनीतश्चबकव्रतचरोद्विजःये
व्रतिनोविप्रायेचमार्जारलिंगिनःतेपतंत्यंधतामिस्रे
नपापेनकर्मणेतिश्रद्धाविहीनास्तुकेचिद्विषयभो
राःकेचित्पांडित्यादिगर्वेणभगवद्भक्तिनिंदापराःसंत
स्येपिनिंदनीयाएवभवंतीत्युक्तंमधुसूदनसरस्वती
णोःब्राह्मणक्षत्रियविट्शूद्रावर्णाइत्यादिकंतुकस्य
स्यापाषंडिनोजीविकार्थंकाषायांवरधारिणःशठस